राजीवगान्धीपरिसरग्रन्थमाला : ३

पदचातुर्विध्यविचारः

ग्रन्थकर्ता

डा. चेरुकुमिल्लि सत्यसूर्यनरसिंहमूर्तिः

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

राजीवगान्धीपरिसरः

शृङ्गेरी - ५७७ १३९

२००८

राजीवगान्धीपरिसरग्रन्थमाला-२

पदचातुर्विध्यविचारः

ग्रन्थकर्ता
डा.चेरुकुमिल्लि सत्यसूर्यनरसिंहमूर्तिः



राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः
शृङ्गेरी - ५७७ १३९

२००८

Title : PADACĀTURVIDHYAVICĀRAH

Author : ***Dr. C.Satya Surya Narasimha Murthy***

© : Publisher

Published by : ***Principal***
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD, Govt. of India)
Rajiv Gandhi Campus
SRINGERI - 577 139 (Karnataka)

Edition : First

Year : 2008

Copies : 500

Price

Type setting : Ram & Kam DTP Shoppe, Sringeri
Printed at : **ANNAPURNA GRAPHICS SCREENS & OFFISET PRINTERS,**
TIRUPATI - 517 507.



।। श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ।।

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण
यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ
तपश्चक्रवर्त्यनाद्यविच्छिन्नश्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य
व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक
सर्वतन्त्रस्वतन्त्रादिराजधानी विद्यानगरमहाराजधानी कर्णाटकसिंहासनप्रतिष्ठापनाचार्य
श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि
श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामिगुरुकरकमलसञ्जात

।। श्री जगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थमहास्वामिभिः ।।

अस्मदत्यन्तप्रियशिष्य चेरुकुमिल्लि सत्यसूर्यनरसिंहमूर्तिविषये नारायणस्मरणपुरस्सरं विरचिता आशिषस्समुल्लसन्तु । अतिरोहितमिदं समेषां लोकानां यत् वेदाङ्गेष्वभ्यर्हिततमं व्याकरणमिति । अत एव मुखं व्याकरणं स्मृतमिति मुखस्थानीयतया तत् संकीर्त्यते । तच्च सर्वैरप्यवश्यमध्येयं येनसुष्ठु सुरभारत्या व्यवहर्तुं सामर्थ्यमवाप्यते । व्याकरणञ्च प्राधान्येन पदसाधुत्वं व्युत्पादयति । अत एवेदं पदशास्त्रमिति संगिरन्ते अभियुक्ताः । तानि च पदानि नामाख्यात निपातोपसर्गभेदेन चतुर्धा विभक्तानि । व्याकरणग्रन्थेषु तानि पदजातान्यधिकृत्य भूयान् विचारः समुपलभ्यते ।

भवान् भाष्यान्तं व्याकरणं यथासम्प्रदायमधीत्य शिष्यानध्यापयन् पदविषये व्याकरणग्रन्थेषूपलभ्यमानान् विषयान् संगृह्य स्वीयया शैल्या पदचातुर्विध्याविचार नामानं निबन्धं न्यबध्नादित्यवेत्य प्रसीदामः । पदतत्त्वं जिज्ञासमाना अन्तेवसन्तः ग्रन्थेनानेनोपकृता भविष्यन्तीति मन्यामहे ।

श्रीशारदाशशिकलावतंसयोरसीमया कृपया भवान् श्रेयः परम्पराभिस्समभिवर्धतामित्याशास्महे ।

शृङ्गगिरिः
सर्वजिद्वत्सरीय माघकृष्णपञ्चमी
भौमवासरः - २६.२.२००८

इति नारायणस्मरणम्

प्रो. वेम्पटि कुटुम्ब शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालयः
(मानवसंसाधन विकास मंत्रालय, भारत सरकार के अधीन)

Prof. V. Kutumba Sastry
Vice Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed University
(Under MHRD, Govt. of India)

दिनाङ्कः - १७-०३-२००८

शुभसन्देशः

अस्मद्राष्ट्रियसंस्कृतसंस्थानस्य शृङ्गगिरिस्थराजीवगान्धी-परिसरव्याकरणशास्त्रवरिष्ठाध्यापकेन, जगद्गुरुशङ्कराचार्यैः श्री श्री श्री भारतीतीर्थमहास्वामिभिः स्वर्णाङ्गुलीयकसभाजितेन, व्याकरणवागीशेभ्यः पण्डितवरेण्येभ्यः महामहोपाध्यायेभ्यः श्रीपेरि सूर्यनारायणशास्त्रिमहादेयेभ्यः समधिगतपदशास्त्रेण तत्रभवता डा. चेरुकुमिल्लि सत्यसूर्यनरसिंहमूर्तिना व्याकरणशास्त्रे पदचातुर्विध्यविचारः नामा ग्रन्थोऽयं विरचित इति विज्ञाय मोमुद्यते नः स्वान्तम् ।

इतरदार्शनिकसम्मतजातेः, वैयाकरणाभ्युपगतजातेश्च को भेद इति, किञ्च तथा भूतायाः जातेरङ्गीकारे प्रयोजनमिति सदृष्टान्तं विवेचितम् । महाभाष्योक्तजातिलक्षणानि षट् विमृश्य भाष्यकाराणां क्व तात्पर्यमिति सप्रमाणं निरूपितम् । एवमेव नामाख्यातोपसर्गनिपातविषयकविचाराः गभीराः उपलभ्यन्तेऽस्मिन् पुस्तके । कर्तृकर्मसंख्याकालाः तिङर्थाः इति निरूप्य आख्यातार्थसंख्या धात्वर्थव्यापारे एवान्वेति इति सयुक्तिकं सखण्डदेवमतं न्यरूपि। कालविषये गुरुणा भर्तृहरिणा प्रतिपादिताः गहनाः विचाराः सरलया रीत्या अत्रोपनिबद्धाः । गभीरा अपि विचाराः सरलया शैल्या निरूपिता इति ग्रन्थस्यास्य वैशिष्ट्यं वरीवर्ति ।

भगवत्याः शारदाम्बायाः, जगद्गुरूणां श्रीश्री भारतीतीर्थमहास्वामिनां निरवग्रहानुग्रहेण च इत्थमेव बहुप्रयत्नसाध्यान् व्युत्पत्तिदान् ग्रन्थान् विरचय्य बुधलोकं भृशमुपकरोत्वित्याशास्महे ।

(वेम्पटि कुटुम्बशास्त्री)

56-57, Institutional Area, Janakpuri, New Delhi-110 058
Ph.: (O) 28523949 (R) 25085238 Fax : 28521948

प्रो.ए.पि. सच्चिदानन्दः
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
राजीवगान्धीपरिसरः
शृङ्गेरी - 577139 (कर्णाटकम्)

PROF. A.P. SACHIDANANDA
Principal.
RASHTRIYA SANSKRIT SANSTHAN,
Deemed University,
Rajiv Gandhi Campus,
Sringeri (KARNATAKA)-577 139.

प्रास्ताविकम्

नमः पाणिनिकात्यायनपतञ्जलिभ्यः शब्दविद्यासम्प्रदायकर्तृभ्यो नमो महद्भ्यः। पुरा खल्वासीत् कश्चन कालः, समग्रे भरतवर्षे आपामरपण्डितम्, आबालवृद्धं च सर्वेऽपि भावाविष्काराय संस्कृतमेव व्यवहरन्ति स्म। काले गते बहुतिथे परकीयाणामाक्रमणेन, तत्संस्कृतिप्रभावेण च संस्कृतं नष्टप्रायमेवाभूत्। किन्त्वयमस्ति संस्कृतस्योज्जीवनकालः। शोश्रूयते महाकवेः कालिदासस्य वचनं - नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण इति। अनेन चक्रनेमिन्यायेन ह्रासतां गतं संस्कृतं पुनरद्यत्वे जगतीतले उन्नतं स्थानमश्नुवानं, सर्वानपि समाकर्षद्दरीदृश्यते। तत्र निदानं बहूनां महात्मनां परिश्रमः, विविधसंस्थानां व्यवसायश्च। अस्माकं राष्ट्रियसंस्कृतसंस्थानमपि संस्कृतोज्जीवनमेव तद्धि तपस्तद्धि तपः इति परिगृह्य अनवरतं सुरभारत्या वरिवस्यां विदधानं विलसति। अस्यां दिशि संस्थानस्य मुख्यकार्यालयेन अपूर्वा अमुद्रिता ग्रन्थाः, मुद्रिताश्चानुपलभ्यमाना मुद्राप्यमाणाः सन्तीति महतः प्रमोदस्यायं विषयः। तद्वत् संस्थानस्य विविधपरिसरैरपि विद्वत्पूर्णाः अनेके ग्रन्थाः प्राकाश्यं नीता नीयमानाश्च विद्यन्ते। एवमेव शृङ्गगिरिस्थराजीवगान्धिपरिसरेणापि गते हायने इदं प्रथमतया न्यायशास्त्रीयः, न्यायशास्त्रविभागाध्यक्षेण डा. नवीन होळळ महाशयेन विरचितः, सप्तपतिपक्षशतकोटि ग्रन्थस्य व्याख्यारूपः, विवेचनी नामा ग्रन्थः प्राकाश्यमनीयत। तच्च ग्रन्थरत्नं समग्रे भारते पण्डितप्रवराणां प्रशंसापात्रतां प्रापदिति महिमाऽस्य ग्रन्थस्य, परिसरस्य च। संवत्सरेऽस्मिन् पदचातुर्विध्यविचार नामा व्याकरणशास्त्रीयो ग्रन्थः संस्कृतसारस्वतलोकाय समर्प्यमाणो वरिवर्ति।

ईषदत्र प्रकृतम् -

परमकारुणिकाः भगवन्तः पाणिनि-कात्यायन-पतञ्जलयो महर्षयः शब्दज्ञानाय शब्दशास्त्रं प्रणिनिन्युः। तत्र महाभाष्यकारेण व्याकरणाध्ययनप्रयोजन-

प्रतिपादनावसरे चत्वारि वाक् इति मन्त्रव्याचिख्यासायां चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः इत्युक्तम् । एतत्पदचातुर्विध्यमेव संस्कृतप्रपञ्चेऽवलोक्यते नातिरिक्तम्। तत्र नाम इति शब्देन किं ग्राह्यमिति शङ्कायां नमति-आख्यातार्थं प्रति विशेषणीभवति इति व्युत्पत्तिमादृत्य प्रातिपदिकमेव नामपदेन जगृहिरे दीक्षितकौण्डभट्टादयः । सुबन्तमेवेति नागेशभट्टादयः प्राहुः । तत्र नागेशमतमेव ज्याय इति ग्रन्थकारेण प्रत्यपादि ।

ततः सुबन्तेषु भासमानानां जाति-द्रव्य-लिङ्ग-संख्या कारकाणां विचारो विस्तरेण व्यधायि । ननु जातेर्नित्यत्वं प्रायेण सर्वैरपि अभ्युपगम्यते । जातेः व्युत्पिपादयिषायां जायते असौ इति विग्रहः प्रदर्श्यते चेत् जातेः अनित्यत्वापत्तिः इति चेत् न, साधुत्वार्थं व्युत्पत्तिमात्रप्रदर्शन परमेतत्। अतो न नित्यत्वहानिः । सत्यपि जातिव्यक्तिभेदेन पक्षद्वये जातिविशिष्टव्यक्तिवादिनो वैयाकरणा इति भाष्यकृत्सम्मतसिद्धान्तोऽस्मिन् ग्रन्थे विशिष्य प्रतिपादितः ।

स्तनकेश वती स्त्री स्यात् इत्यादिलक्षणलक्षितं लौकिकं लिङ्गमिह नाश्रीयते । सत्वरजस्तमोगुणानाम् उपचयापचयसाम्यावस्थात्मकं चेतनाचेतनसाधारणं लिङ्गमाश्रीयते । गुणानां उपचयापचयसाम्यावस्था योगिगम्या न त्वस्मदादिभिः । अतः शब्दानां लिङ्गज्ञाने वृद्धव्यवहार एवाभ्युपायः ।

द्रव्याणां भेदव्यवहारहेतुः संख्या संख्या सर्वस्य भेदिका इत्युक्तेः । स्वाश्रयं भिन्नतया अभिन्नतया वा सम्यग्बोधयतीति संख्या । द्रव्यस्य भेदाभेदव्यवहारः द्वित्वैकत्वादिसंख्याकृत एव । यद्यपि लोके प्रातिपदिकस्य प्रत्ययेन सम्बन्धे संख्यायाः प्रतीतिः तदभावेत्वप्रतीतिरिति संख्या प्रत्ययार्थ इत्यनुभूयते तथापि संख्या प्रकृत्यर्थ एव, दधि अशान, वारि आनय इत्यादौ प्रत्ययदर्शनाभावेऽपि संख्याकर्मदीनां दर्शनात् । जातिः, व्यक्तिः, लिङ्गं, संख्या, कारकं चेति पञ्चकं प्रातिपदिकार्थ इति पक्षे सुप्प्रत्ययानां द्योतकत्वमेव ।

अस्ति महान् विवाद आख्यातविषयेऽपि । भावप्रधानमाख्यातम् इति यास्कोक्तौ आख्यातशब्दस्य तिङन्तमर्थ इति केचित्, तिङित्यपरे, धातुरित्यन्ये च सङ्गिरन्ते । अत्र चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः इति भाष्यस्वारस्यात् भावप्रधानमाख्यातमिति निरुक्तवचनाच्च तिङन्ततिङ्प्रत्ययातिरिक्तो धातुरेव ग्राह्य इति पेरीसूर्यनारायणशास्त्रिण आशेरते ।

प्राद्युपसर्गाणां, चादिनिपातानां च द्योतकता, वाचकता वेति संशये

द्योतकतैवेति वैयकरणसिद्धान्तः। अत्रायं संशय उदियात्, उपसर्गविशिष्टस्यैव धातुत्वं वाच्यम्, कुतः पुनरयं धातूपसर्गयोः भद इति। उपसर्गविशिष्टस्य धातुत्वे अडादय उपसर्गात् प्रागेव प्रवर्तेरन्, तिङ्ङतिङः इत्यादिस्वराश्च नोपपद्येरन्। अतोऽत्र धातूपसर्गविभागः पर्यकल्पि।

एतान् सर्वानपि दुरूहान् विचारान् ग्रन्थकृदत्र उपन्यभान्त्सीत्। यद्यपि एते विचारा मञ्जूषा वाक्यपदीयादिग्रन्थेषु उपलभ्यन्ते तथाऽपि ते दुर्बोधा भवन्तीति सुलभग्राह्यतयाऽत्र व्याख्याताः। ग्रन्थोऽयम् अस्मत्परिसरीयव्याकरणविभागाध्यक्षेण विदुषा चेरुकुमिल्लि सत्यसूर्यनर
सिंहमूर्तिमहोदयेन विद्वन्निकाये लब्धप्रतिष्ठेन समरच्यत। व्याकरणवागीशेत्यादिबिरुदालङ्कृतेभ्यः नानाशास्त्रनदीष्णेभ्यः पेरी सूर्यनारायणशास्त्रिमहाभागेभ्योऽधिगतशब्दविद्योऽसौ नरसिंहमूर्तिमहोदयः शृङ्गगिरिस्थ श्रीदक्षिणाम्नायशारदापीठाधीश्वराणां श्री श्री श्री भारतीतीर्थमहास्वामिनां समक्षं स्वीयप्रतिभया प्रकटितवैदुष्यस्तेभ्यः स्वर्णाङ्गुलीयकं सम्प्राप्य छात्रान् अध्यापयन् परिसरस्य प्रतिष्ठां संवर्धयतीति वयं सर्वेऽपि तदीयकर्मणा सन्तुष्यामः। श्रीमान् नरसिंहमूर्तिमहोदयः इतोप्युत्कृष्टग्रन्थरचने आत्मानं, व्यापारयतात्, भगवती सरस्वती तं प्रेरयत्विति आशास्महे।

यत्कृपया परिसरोऽयं प्रतिवत्सरं वृद्धिं यन् वरिवर्ति तेषां शृङ्गगिरिशारदापीठाधीश्वराणां श्री श्री श्री भारतीतीर्थमहास्वामिनां श्रीमुखरूपोऽनुग्रहोऽस्य ग्रन्थस्य प्राप्त इति वयमात्मनो धन्यान् मन्यामहे। श्री चरणानाम् अप्रकम्प्यानुकम्पयैतादृशग्रन्था उत्तरोत्तरं प्राकाश्यमीयासुरिति भगवतीं शारदाम्बां सम्प्रार्थयामहे।

परिसरद्वारा ग्रन्थप्रकाशनाय अनुमतिं प्रदाय आमुखं च विरचय्यानुगृहीतवद्भ्यो विद्वद्भ्योऽस्मत्कुलपतिभ्यः प्रो. वि. कुटुम्बशास्त्रिचरणेभ्यः प्रणति प्रसूनानि समर्पयामः।

अधीयानानाम् अध्यापयतां च व्याकरणसिद्धान्तावगमक्लेशापनोदाय विरचितोऽयं ग्रन्थोऽवश्यं फलेग्रहिर्भवेदिति दृढीयान्नो विश्वासः।

इत्थं

श्री सर्वजित्-फाल्गुनकृष्णषष्ठी गुरुवासरः (27.03.2008)

विद्वदाश्रवः
(ए.पि. सच्चिदानन्दः)

विनिवेदनम्

रत्नगर्भं तोरणस्थं विद्याशक्तिस्वरूपकम्।
स्तम्भस्थं च **गणाध्यक्षं** ध्याये प्रत्यूहवारकम्।।
रत्नाद्रौ शोभमानं जनहितकरं **सत्यनारायणा**ख्यम्
आम्नायैरेववेद्यान् जगति गुरुगुरून् **भारतीतीर्थपादान्**।
मञ्जूषारण्यविष्टान् मम पदगुरून् **सूर्यनारायणा**ख्यान्
शृङ्गेरीशारदाम्बां गुरुगणविभवां सर्वदैतान् प्रणौमि।।
कामेश्वर्याश्चरणरजसा शक्तिमद्वंशराजे
अन्नप्पार्याः जनकजनकाः दानकर्मप्रवीणाः।
सुब्रह्मण्यो य इह **जनिदः** धारयन्**कार्त्तिकेयं**
माणिक्याम्बा ललनकलनैः **मातृमूर्ति**र्विरेजे।।
कौण्डिन्यगोत्रसम्भूतः **नरसिंहा**भिधः सुधीः।
लक्ष्म्या संश्लिष्टवामाङ्गः कुर्वे **पदं**चतुष्टयीम्।।

भगवतः सत्यदेवस्य निवासस्थानं विद्यते आन्ध्रदेशेऽन्नवरक्षेत्रम्। तत्र समुत्पन्नोऽहं बाल्ये तत्रैवाधीत्य दैवानुग्रहेण व्याकरणवागीशानां महामहोपाध्यायानां शब्दखण्डे कृतभूरिपरिश्रमाणां राष्ट्रपतिपुरस्कृतानां पूज्यश्री **पेरिसूर्यनारायणशास्त्रि**चरणाना मन्तेवासित्वं सम्प्राप्नुवम्। विद्याचणाः तेऽपत्यनिर्विशेषं मामध्यजीगपन्। ततोऽहम् आन्ध्रदेशीयगुरुकुलविद्यालयेषु षोडशवर्षाणि अध्यापकपदव्यां कार्यमकार्षम्। ततः परमहं २००२तमे वर्षे राष्ट्रियसंस्कृतसंस्थानेन शृङ्गगिरौ विराजमाने **राजीवगान्धीपरिसरे** न्ययुञ्जि। भगवत्याः **शारदाम्बायाः,श्री श्री भारतीतीर्थमहास्वामि**नामसीमानुकम्पया समभिवर्धमानेऽस्मिन् परिसरे नियुक्तिः पुण्यवशादेवालभ्यत इत्यहमहर्निशं भावये। क्षेत्रपालिकां भगवतीं वाग्देवीं शारदां सभक्तिश्रद्धं नौमि। जगद्गुरु **श्री श्री भारतीतीर्थमहास्वामिनः** मयि कारुण्यं प्रदर्श्य श्रीमुखं दत्त्वा, पुस्तकस्यास्यान्वर्थं नामकरणं कृत्वाऽनुगृहीतवन्तः। तेभ्यः

साष्टाङ्गप्रणतिपुरस्सरं कृतज्ञताञ्जलिं समर्पयामि।

पुस्तकस्यास्य शुभसन्देशं विलिख्य सम्प्रेष्य मामनुगृहीतवद्भ्यः संस्कृतप्रचारे बद्धश्रद्धेभ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभ्यः आचार्य **वेम्पटि कुटुम्बशास्त्रि**महोदयेभ्यः साञ्जलिबन्धमाधमर्ण्यं प्रकटये।

परुदिव ऐषमोऽपि अस्मत्परिसरादेकं शास्त्रसम्बद्धं पुस्तकं प्रकाशनीयमिति प्राचार्याः आचार्य **देवनाथाचार्याः** मामसूचयन्। तेषां गीर्भिः प्रेरितोऽहं पुस्तकमेतत् लेखितुमुद्युक्तः अभूवम्। एवं प्रेरणां दत्तवद्भ्यः सम्प्रति गुरुवायूरुपरिसरे विराजमानेभ्यः तेभ्यःकार्तज्ञ्यं निवेद्यते। पुस्तकस्यास्य प्रकाशनार्थं प्रयत्नं विददद्भ्यः प्राचार्येभ्यः आचार्य **ए पि सच्चिदानन्द**महोदयेभ्यः कृतज्ञतामाविष्करोमि।

जगद्गुरुश्रीमठीयसद्विद्यासञ्जीविनीसंस्कृतमहापाठशालायाः अध्यक्षाः विद्वांसः **एम् ए नागराजभट्टाः** समग्रमेतदवलोक्य निर्दिष्टं रूपं प्रादुः। अतस्तेभ्यः हार्दं कार्तज्ञ्यं समर्पये। पुस्तकस्यास्य अक्षरविन्यासशोधने ममात्यन्त मुपकुर्वद्भ्यां मद्विभागीयाभ्यां विद्वद्भ्यां **डा चन्द्रशेखरभट्ट,कृष्णानन्तपद्मनाभाभ्या** माशिषः। एवमेव पुस्तकसम्पुटीकरणे साहाय्यं कृतवते **को गिरिधराय** मङ्गलं कामये। पुस्तकस्यास्य मुद्रणे उपकृतवद्भ्यः मित्रमणिभ्यः राष्ट्रियसंस्कृतविद्यापीठीयव्याकरणविभागाध्यक्षेभ्यः आचार्य **जानमद्दि रामकृष्णमहोदयेभ्यः** हार्दं कार्तज्ञ्यं समर्पयामि। समये सुन्दरं मुद्रणं कृत्वा दत्तवद्भ्यः अन्नपूर्णमुद्रणालयाधिकारिभ्यः **कम्प्यूटर्शर्मभ्यः** कार्तज्ञ्यं विनिवेद्यते। पुस्तकस्यास्य टङ्कने उपकृतवद्भ्यः मदन्तेवासिभ्यः **प्रमोद-यदुवीर-प्रियव्रतेभ्यः** आशिषः।

शृङ्गेरी — इत्थम्

सर्वजित् फाल्गुण कृष्ण षष्ठी — बुधजनविधेयः

२८-०३-२००८ — **चेरुकुमिल्लि सत्यसूर्यनरसिंहमूर्तिः**

विषयानुक्रमणी

०.	उपोद्घातः।	1
१.	पूर्वपीठिका ।	6
२.	नाम ।	9
३.	जातेः वाच्यत्वप्रतिपादनम् ।	9
४.	वाक्यपदीयकाराणामाशयः ।	10
५.	कैयटाशयः ।	15
६.	भाष्योक्तजातिलक्षणानि ।	15
७.	प्रथमलक्षणस्याभिप्रायः ।	16
८.	द्वितीयलक्षणस्याभिप्रायः ।	16
९.	शब्देन्दुशेखरकाराशयः ।	20
१०.	प्रादुर्भावविनाशाभ्यां .....इत्यस्य विवरणम् ।	22
११.	अयमत्रनिष्कर्षः ।	23
१२.	जननेन या प्राप्यते सा जातिः ।	24
१३.	आविष्टलिङ्गा जातिः ।	24
१४.	असर्वलिङ्गा जातिः ।	25
१५.	निष्कृष्टं जातिलक्षणम् ।	25
१६.	अयमत्र सङ्ग्रहः।	26
१७.	निष्कृष्टविचारः।	26
१८.	भाष्ये द्रव्यपदार्थविचारः ।	29
१९.	वाक्यपदीयकाराणामाशयः ।	30
२०.	विशिष्टस्य वाच्यत्वप्रतिपादनम् ।	31
२१.	भाष्यकाराणामाशयः ।	32
२२.	लिङ्गविचारः ।	33
२३.	लिङ्गं प्रातिपदिकार्थः ।	37
२४.	संख्याविचारः ।	38
२५.	वैशेषिकाणामाशयः ।	39
२६.	वैयाकरणानामाशयः ।	40
२७.	कारकविचारः ।	40

२८. क्रियाजनकत्वं कारकत्वम् । 42
२९. कारकस्य प्रातिपदिकार्थत्वप्रतिपादनम् । 43
३०. पञ्चानां प्रातिपदिकार्थत्वप्रतिपादकभाष्याणि । 44
३१. बहुषु बहुवचनम् इति सूत्रभाष्यम् । 45
३२. क्रीतात् करणपूर्वात् इति सूत्रभाष्यम् । 47
३३. आख्यातपदस्यार्थविवरणम् । 47
३४. धात्वर्थविषये दार्शनिकाणामभिप्रायः । 48
३५. फलस्वरूपनिरूपणम् । 49
३६. सप्रमाणं फलस्य धात्वर्थत्वप्रतिपादनम् । 51
३७. फलस्य धात्वर्थत्वे वाक्यपदीयकारसम्मतिः । 52
३८. कौमुदीकाराणामाशयः । 53
३९. फलस्य धात्वर्थत्वे भूषणकाराणामाशयः । 53
४०. मञ्जूषाकाराणामाशयः । 54
४१. व्यापारलक्षणम् -वाक्यपदीयकाराणामाशयः । 56
४२. साध्यक्रियालक्षणम् । 57
४३. भूषणकाराणामाशयः । 57
४४. शब्दरत्नकाराणामाशयः । 58
४५. व्यापारस्य धात्वर्थत्वप्रतिपादनम् । 59
४६. तिङर्थाः । 59
४७. कर्तृस्वरूपनिर्णयः । 59
४८. वाक्यपदीयकाराणामाशयः । 60
४९. भूषणकाराणामाशयः । 61
५०. मनोरमाशब्दरत्नकारयोराशयः । 61
५१. दीक्षिताशयः । 63
५२. भूषणकाराशयः । 64
५३. अयमत्रनिष्कर्षः । 64
५४. मञ्जूषाकाराशयः । 66
५५. कर्मस्वरूपनिर्णयः । 67
५६. काशिका - पदमञ्जरीकारयोराशयः । 69

५७. कौमुदीकाराशयः । 69
५८. मञ्जूषाकाराशयः । 70
५९. कर्तृकर्मणोः तिङर्थत्वप्रतिपादनम् । 72
६०. भाष्यप्रामाण्यम् । 73
६१. सङ्ख्यायाः अन्वयः । 73
६२. नैयायिकमते सङ्ख्यायाः अन्वयः । 73
६३. युक्तिप्रदर्शनम् । 74
६४. कालस्वरूपनिर्णयः । 74
६५. कालस्यान्वयः । 77
६६. कालस्य फलेऽन्वयनिराकरणम् । 77
६७. पञ्चकं धात्वर्थः इति पक्षस्थापनम् । 78
६८. सङ्ख्यान्वये नवीनानामाशयः । 78
६९. कारकयोः भेदप्रदर्शनम् । 79
७०. उपसर्गस्वरूपनिरुपणम् । 80
७१. वाक्यपदीयकाराणामाशयः । 81
७२. उपसर्गाणां स्वरूपम् । 81
७३. उपसर्गाणां द्योतकत्वे युक्तिप्रदर्शनम् । 83
७४. निपाताः । 84
७५. निपातानां द्योतकत्वे युक्तयः । 84
७६. निपातानां स्वरूपम् । 85
७७. कर्मणि लकारसिद्धिप्रयोजनविवरणम् । 85
७८. व्युत्पत्तिविरोधप्रदर्शनम् । 86
७९. व्युत्पत्त्यन्तरविरोधप्रदर्शनम् । 87
८०. दोषान्तरप्रदर्शनम् । 87
८१. काव्यादिषु दोषप्रदर्शनम् । 87
८२. अब्राह्मणः इत्यत्र समाससिद्धिः । 89
८३. निपातानां विभागः । 89
८४. उपसंहारः । 91

सङ्केतानां विवरणम्

वा.द्वि	-	वाक्यपदीये द्वितीयकाण्डम् ।
वा.क्रि	-	वाक्यपदीये क्रियासमुद्देशः ।
वा.भू	-	वाक्यपदीये भूयोद्रव्यसमुद्देशः ।
वा.सा	-	वाक्यपदीये साधनसमुद्देशः ।
का.सं	-	कारिकासंख्या ।
वा.का	-	वाक्यपदीये कालसमुद्देशः ।
वा.उप.स	-	वाक्यपदीये उपग्रहसमुद्देशः ।
प्रपञ्च.सा.तं पट.श्लो	-	प्रपञ्चसारतन्त्रम् पटलम् श्लोकः ।
वा.जा	-	वाक्यपदीये जातिसमुद्देशः ।
वा.लिङ्ग	-	वाक्यपदीये लिङ्गसमुद्देशः ।
वा.सं	-	वाक्यपदीये संख्यासमुद्देशः
वा	-	वार्तिकम् ।



उपोद्घातः

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।।

जगति विद्यमानेषु पाणिषु उत्कृष्टो भवति मानवः । सः सततं नूतनं किमप्यन्वेष्टुं प्रयतमान एव भवति। तिर्यग्जन्तूनामपेक्षया बुद्धिमताऽनेन वागसृज्यत । तादृश्या वाचा सः सर्वेषां प्राणिनां प्रीतिपात्रतां जगाम ।

सुभाषितकार आह -

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ।। इति।।

वाक् - भाषा इत्यनर्थान्तरम् । भाषां विना नान्यारीतिः भावप्रकटनाय सुयोग्या भवति । व्यवहारायैव भाषा प्राचीनै रन्विष्टा । तादृशी भाषा सारला शुद्धा चेल्लौकिकानां मोदजनिका , तात्पर्यबोधिका च भवतीत्यत्र नास्ति संशीतिः । सम्प्रति प्रपञ्चे त्रिसहस्राधिकाः भाषाः सन्तीति भाषाशास्त्रज्ञानामाशयः । तासु भाषासु विद्यते रम्या गैर्वाणी । उक्तञ्च सुभाषितकारेण -

दिव्यां भव्यां सुबोधाञ्च शुद्धामर्थप्रदायिनीम् ।
जननीं बहुभाषाणां वन्दे गीर्वाणभारतीम् ।। इति।।

गैर्वाण्या इदं वैशिष्ट्यमस्त्यस्याः प्रथितं व्याकरणं विद्यते । सत्सु बहुष्वपि व्याकरणेषु पाणिनीयमेव सर्वातिशायि वरीवर्ति । उक्तञ्च पराशरपुराणेऽपि -

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं,त्याज्यं न किञ्चन ।। इति।।

पाणिनीयेऽष्टावध्यायाः सन्ति । अत एवास्य 'अष्टाध्यायी' ति व्यवहारः समजनि । अष्टासु अध्यायेषु तृतीयचतुर्थपञ्चमाध्यायेषु त्रिषु इच्छाद्यर्थेषु प्रत्ययाः विहिताः। यथा -

अ) सनाद्यन्ता धातवः (३-१-३२) इत्यनेन 'सन्' इत्यारभ्य द्वादशप्रत्ययाः प्रतिपादिता स्ते यथा -

०१. सन् - मीमांसते , जिगमिषति
०२. क्यच् - पुत्रीयति ,
०३. काम्यच् - पुत्रकाम्यति ,
०४. क्यङ् - विद्वायते ,
०५. क्यष् - लोहितायति, लोहितायते ,
०६. क्विप् - कृष्णति ,
०७. णिच् - चोरयति , पाचयति , पटयति ,
०८. यङ् - बोभूयते ,
०९. यक् - कण्डूयति ,
१०. आय - गोपायति ,
११. ईयङ् - ऋतीयते ,
१२. णिङ् - कामयते ।

आ) स्यतासी लृलुटोः (३-१-३३) इत्यारभ्य त्रयोविंशति विकरणप्रत्ययाः प्रोक्ताः, ते यथा - स्य, तास्, सिप्, आम्, च्लि, सिच्, क्स, चङ्, अङ्, चिण्, यक्, शप्, श्यन्, श्नु, श, श्नम्, उ, श्ना, शानच्, शायच्, अङ् (लिङ्याशिष्यङ्), चिण् (चिण् भावकर्मणोः), श्यन् (कुषिरजोः प्राचां श्यन् परस्मैपदञ्च)।

इ) लुङ् इत्यारभ्य दशलकाराः कथिताः। लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् इति ।

ई) तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (३-४-७८) इत्यनेन अष्टादशप्रत्ययाः उक्ताः। ते यथा -

तिप्----तस्----झि
सिप्----थस्----थ
मिप्----वस्----मस्
त------आताम्--झ
थास्---आथाम्---ध्वम्
इट्----वहि-----महिङ्

उ) कृदतिङ् (३-१-९३) इत्यनेन कृत्संज्ञां विधाय,तत्र पाणिनिकात्ययनौ प्रायेण त्रिंशदुत्तरैकशतं प्रत्ययान् प्रत्यपादयताम्। ते यथा - तव्यत्, तव्य, अनीयर्, केलिमर्, यत्, क्यप्, ण्यत्, क, श, ण, ष्वुन्, थकन्, ण्युट्, वुन्, अण्, टक्, अच्, ट, इन्, खश्, खच्, ड, क्विन्, ण्वि, ञ्युट्, विट्, ण्विन्, मनिन्, क्वनिप्, वनिप्, क्विप्, णिनि, क्त, क्तवतु, कानच्, क्वसु, शतृ, शानच्, शानन्, चानश्, तृन्, इष्णुच्, ग्स्नु, क्नु, घिनुण्, वुञ्, युच्, इनि, उकञ्, क्वरप्, ऊक, उ, र, कि, किन्, नजिङ्, आरु, क्रुक्, लुकन्, वरच्, ष्ट्रन्, इत्र, घञ्, णच्, इनुण्, अप्, क्त्रि, अथुच्, नङ्, नन्, क्तिन्, अ, अङ्, ण्वुल्, इक्, श्तिप्, कार, छ, ण्वुच्, अनि, ल्युट्, घ, खल्, तुमुन्, क्तिच्, से, सेन्, असे, असेन्, कसे, कसेन्, अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै, शध्यैन्, तवै, तवैङ्, तवेन्, णमुल्, कमुल्, तोसुन्, कसुन्, केन्, केन्य, त्वन्, क्त्वा, खमुञ्, इफ, ङ्वनिप्, अतृन्, षाकन्, तृच्, ख, ख्युन्, खिष्णुच्, खुकञ्, विच्, ल्यु, आलुच्, रु, क्मरच्, घुरच्, कुरच्, डु, नि, युच्, इञ्, अकच्, डर्, इक, इकवक, धमुञ् ।

ऊ) स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४-१-२) इत्यनेन एकविंशतिः सुप्प्रत्ययाः प्रोक्ताः। ते यथा -

सु ----------औ ----------जस्

अम् --------औट् ---------शस्

टा ----------भ्याम् --------भिस्

ङे----------भ्याम्-------- -भ्यस्

ङसि -------भ्याम् --------भ्यस्

ङस् -------ओस् --------आम्

ङि ---------ओस् -------- सुप्

ऋ) स्त्रियाम् (४-१-३) इत्यधिकारे ' अजाद्यतष्टाप् ' (४-१-४) इत्यारभ्य नव प्रत्ययाः कथिताः । एतेषां स्त्रीप्रत्यय इति व्यवहारो दृश्यते । ते यथा -

टाप् ------- डाप् --------चाप्

ङीप् ------- ङीष् ------- ङीन्

ऊङ् ------- ति --------- ष्फ

ॠ) तद्धिताः '(४-१-७६) इत्यधिकारे 'यूनस्तिः'(४-१-७७) इत्यारभ्य प्रायः त्रिसप्तत्युत्तरद्विशतं प्रत्ययाः पाणिनिकात्यायनाभ्यां प्रतिपादिताः। ते यथा -

ति, ष्यङ्, अण्, यत्, ण्य, अञ्, नञ्, स्नञ्, फक्, फिञ्, इञ्, च्फञ्, यञ्, फञ्, ढक्, ऐरक्, द्वक्, आरक्, छण्, ढञ्, घ, ख, यट्, ढकञ्, खञ्, छ, व्यत्, ठक्, ण, व्यन्, ञ्यङ्, अन्, कन्, ङ्यत्, ङ्य, इनि, ढञ्, घन्, ट्यण्, ञ्यट्, उलच्, डामहच्, वुञ्, तल्, य, त्र, कट्यच्, विधल्, भक्तल्, ञ, षिकन्, मतुप्, ड्मतुप्, ड्वलच्, वलच्, त्यक्, ष्फक्, वुक्, त्यप्, छस्, ठञ्, ञिठ, म, एण्य, ट्यु, ट्युल्, ठप्,

वुन्, अ, ञ्य, रूप्य, मयट्, यक्, छण्, णिनि, ढिनुक्, तसि, ष्लञ्, ष्ठन्, कक्, ष्ठच्, स्न, टिठन्, ष्ठल्, ङ्यण्, यन्, इल्, स, यल्, तातिल्, थ्यन्, ड्वन्, ईकन्, ष्फन्, घस्, उकञ्, वति, त्व, आ, इमनिच्, ष्यञ्, कुणप्, जाहच्, चुञ्चुप्, चणप्, ना, नाञ्, शालच्, शङ्कटच्, कटच्, तैलच्, टीटञ्, अटच्, इतच्, बिडच् ,बिरीसच् ,इनच्, पिटच्, चिक, चि, नाटच्, भ्रटच्, त्यकन्, द्वयसच्, दघ्नच्, मात्रच्, वतुप्, तयप्, ड, मयट्, डट्, थट्, तीय, तमट्, डुलच्, सोढ, घच्, दूस, इलच्, श, मरीसच्, पिञ्ज, पेज, णस्, एत्य, डण्, ण्यत्, कुटारच्, एति, अयच्, विनि, क्षेत्रियच्, लच्, उरच्, र, म, व, ईरन्, ईरच्, वलच्, यप्, युस्, ग्मिनि, आलच्, आटच्, आमिनच्, ब, भ, युस्, तु, त, यस्, तसिल्, त्रल्, अत्, ह, दा; र्हिल्, अधुना, दानीम्, द्यस्, उत्, आरि, समसण्, एद्यवि, द्य, एद्यसुच्, थाल्, थमु, था, अस्तात्ति, अतसुच्, रिल्, रिष्टातिल्, एनप्, आच्, आहि, न, ध्यमुञ्, पाशप्, आरकन्, आकिनिच्, चरट्, तप्, इनच्, तमप्, इष्ठन्, तरप्, ईयसुन्, रूपप्, कल्पप्, देश्य, देशीयर्, बहुच्, जातीयर्, अकच्, आलुच्, चेलु, डुपच्, ष्टरच्, डतरच्, डतमच्, अङच्, वुच्, ढ, ऊल, ईकक्, टेण्यण्, आति, कृत्वसुच्, सुच्, धा, त्नप्, तनप्, धेय, तल्, क, तिकन्, तिल्, तातिल्, आमु, शस्, तसि, च्वि, साति, त्रा, डाच्, टच्, इच्, आनङ्, निङ्, कप्, अप्, अच्, असिच्, अनिच्, डच्, ष, षच्, ञ्नु, इ, ह्नत्, दतृ ।

शास्त्रे प्रकृतिः धातु-प्रातिपदिकभेदेन द्विधा विभक्ता । पूर्वोक्तेषु अष्टविधेषु प्रत्ययेषु प्राथमिकाः पञ्चविध- प्रत्ययाः धातूद्देशेन , अवशिष्टाः त्रिविधाः प्रत्ययाः प्रातिपदिकोद्देशेन च विहिताः । तत्र धातुप्रकृतिकतिङन्तानां, प्रातिपदिकप्रकृतिकसुबन्तानां च पदत्वं ''सुप्तिङन्तं पदम्'' (१-४-१४) इत्यनुशासनात् । लौकिकाः अर्थबोधनाय पदान्येव प्रयुञ्जीरन्। अवशिष्टैरध्यायैरागमादेशादीन्यन्यानि कार्याणि प्रतिपादयामास पाणिन्याचार्यः। इत्थं पदसाधुत्वबोधकं भवति व्याकरणम् ।

१. पूर्वपीठिका

पदे प्रकृतिप्रत्ययादयः शिष्टैः पाणिन्यादिभि र्बहुधा स्वबुद्धिपरिकल्पनेन समर्थिताः एव, न तु वास्तवाः। तेषां चार्थाः शास्त्रे तथा आचार्यस्य अर्थे शास्त्रप्रक्रियाप्रवृत्तौ निमित्तभूताः शास्त्रीयव्यवहारनिर्वाहार्थं शास्त्रकृत्कल्पिताभ्यां व्यावहारिकाभ्या मन्वयव्यतिरेकाभ्यां कृतप्रविभागाः शास्त्र एव आश्रीयन्ते। कथमिति चेत्, यतः प्रकृत्यर्थप्रत्ययार्थबुद्ध्योः समुदायार्थप्रतिपादनोपायमात्रमेतत्समुदायार्थं प्रति तयोरन्वयव्यतिरेकप्रदर्शनम्। सर्वथाऽपि लौकिकस्य समुदायार्थस्य प्रतिपत्ताविया॒न् प्रकृत्यर्थः, इयांस्तु प्रत्ययार्थ इति भेदो नास्ति, लोकेऽप्रत्ययात्।

पदैर्लोकेऽर्थः प्रतीयते -यथा-वृक्षः,लता,आसनम् इत्यादिषु सुबन्तपदेषु जाति-द्रव्य-लिङ्ग-सङ्ख्या- कारकाणि भासन्ते, एवं पठति, लिखति, भुङ्क्ते इत्यादितिङन्तपदेषु फल-व्यापार-कर्तृ-सङ्ख्या-कालाः, तथा पठ्यते, लिख्यते, पच्यते इत्यादिषु फल-व्यापार-कर्म-सङ्ख्या-कालाश्च बोबुध्यन्ते। एतेषु पदेषु अंशद्वयं विद्यते - प्रकृत्यंशः, प्रत्ययांश इति। विशिष्टेन भासमानेऽर्थे प्रकृत्यंशः कियान्, प्रत्ययांशः कियान् इति विषये शास्त्रे बहुधा वादाः दरीदृश्यन्ते।

तत्र सुबन्तेषु (नामसु) शास्त्रकाराः एवं विचारान् प्रास्ताविषुः ।

	प्रकृत्यंशः	प्रत्ययांशः
अ)	एकः (जातिः/व्यक्तिः)	लिङ्गसंख्याकारकाणि
आ)	द्वौ (जातिव्यक्ती)	लिङ्गसंख्याकारकाणि
इ)	त्रयः (जातिव्यक्तिलिङ्गानि)	संख्याकारके
ई)	चत्वारः (जातिव्यक्तिलिङ्गसंख्याः)	कारकम्
उ)	पञ्च (जातिव्यक्तिलिङ्गसंख्याकारकाणि)	द्योतकः

केषाञ्चिन्मते स्वार्थद्रव्यलिङ्गमात्राभिधायिनी प्रकृतिः , संख्याकर्मादीनां वाचिका विभक्तयः । प्रातिपदिकार्थे संख्याकर्मादीनां विशेष्यतया विशेषणतया वा यथासम्भवं प्रातिपदिकेनाभिधानं विकल्पेन विज्ञायते । संख्याकर्मादीनां मतभेदेन प्रातिपदिकार्थत्वानियमात् । लिङ्गमपि केषाञ्चिन्मते टाबादिभिः द्योत्यम् , केषाञ्चिदभिधेयम् । आह च भर्तृहरिः वाक्यपदीये -

ये शब्दा नित्यसम्बन्धाः विवेके ज्ञातशक्तयः ।
अन्वयव्यतिरेकाभ्यां तेषामर्थो विभज्यते ।। इति ।।

ये विभक्त्यन्ताः शब्दाः स्वार्थे नित्यसम्बन्धाः विवेके सति , प्रकृतिप्रत्यययोः तदर्थयोश्च विभागे सत्येव स्वार्थे ज्ञातशक्तयः, तेषामर्थोऽन्वयव्यतिरेकाभ्यां विभज्यते = सति च प्रातिपदिके प्रत्यये चैकत्वविशिष्टं वृक्षत्वमवगम्यते, असति च तस्मिन्नेकत्वादिविरहितं वृक्षत्वमात्र-मवगम्यते इत्येवमन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थविभागो व्यवस्थाप्यते।

यथा एकस्यैव हि मार्गादेः प्रातिपत्तव्यस्य ज्ञातव्यस्य कश्चिदन्वाख्याता वृक्षेणान्वाख्यान मपरो वल्मीकेनान्यः पर्वतादिभिः करोति। सर्वेषां हि तेषां प्रतिपादकत्वमप्रतिषिद्धम् , सन्निधानात् , तथा गवादीनाम-र्थानामपि स्वसम्बन्धिभिर्जातिगुणस्वाङ्गसंयोजनादिभिः गवादिशब्दव्युत्पत्ति-निमित्तैः सर्वथा प्रतिपादनं क्रियते ।

प्रकृतिप्रत्यययोः पृथगर्थवत्त्वं दृश्यते। तद्यथा -प्रत्ययरहितस्य दधिशब्दस्य प्रयोगो नपुंसके 'दधि'इति। प्रकृतिरहितस्य वतुपः प्रयोगः इयान् - इयत् - इयतीति। एवं केवलस्य प्रत्ययस्य प्रयोगः - 'व्यतिसे' इति। केवलायाः प्रकृतेः प्रयोगः - अहन्, अलेट् इति। तत्र पृथगर्थाभिधानमेव अङ्गीकार्यम्, न त्वन्यतरस्य। सर्वेषां पदानामभिधेयानि द्विधा दृश्यन्ते - लौकिकम्, अलौकिकञ्च। तत्र गोपदस्य लौकिकोऽभिधेयः सास्नादिमान्। अलौकिकस्तु गमनक्रियाविशिष्टस्तदुपलक्षितो वा। परं गोशब्दस्य हि

शयानायामपि गवि प्रयोगो दृश्यत इति गोशब्दस्य गमनरूपं व्युत्पत्तिनिमित्तमनियतम्। गोत्वरूपं प्रवृत्तिनिमित्तं तु नियतम्। अतस्स एव शब्दार्थः।

अर्थप्रतिपादनं चित्रं भवतीति विषये वाक्यपदीयकार एवमाह-

भिन्नाविजियजी धातू नियतौ विषयान्तरे ।
कैश्चित् कथञ्चिदुद्दिष्टौ चित्रं हि प्रतिपादनम् ।। (वा द्वि १७८)

यथैव हि शब्दस्वरूपसामान्ये सत्यपि रूढेषु गवादिशब्देषु, गच्छति, गन्तेत्यादिषु च यौगिकशब्देषु गमेरर्थभेदः स्वभावसिद्धः, तथा इजियज्योरर्थानुगमसामान्ये सत्यपि = अर्थैक्ये सत्यपि शास्त्रे च तयोरर्थवत्त्वरूप -सामान्यपरिग्रहस्योपदेशे कृतेऽपि यजेरन्य एव इजिः किद्विषयः। स्तः, सन्ति इत्यादौ चास्तेरन्यदेव समात्रं धातुरूपं विशिष्टविषयम् = ङिद्विषयम्। एतदपि च पदे धात्वादिकल्पनारूपं दर्शनं सर्वं परमार्थप्रतिरूपकं परमार्थसदृशम्, सादृश्यञ्च चिरस्थायित्वेन व्यावहारिकमेव यावद्व्यवहारमनुवर्तते, न तु वस्तुसत्। पदस्य सुबन्तस्य तिङन्तस्य वा नाम्नो धातोर्वा वस्तुतोऽखण्डत्वात्। न हि धातुरूपं परमार्थेन किञ्चिद्विद्यते, कल्पितत्वात्।

एवं कल्पिताभ्यः प्रकृतिभ्यः, कल्पितेभ्यः प्रत्ययेभ्यः पदानि आविर्भूतानि। तानि च पदानि चतुर्धा विभक्तानि, यथा - **नामाख्यातोपसर्गनिपाताः** इति ।

२. नाम

अ) सत्त्वप्रधानानि नामानि इति निरुक्ते यास्काचार्यः।

आ) नमति आख्यातार्थं प्रति विशेषणीभवतीति नाम इति निरुक्तभाष्यकारः।

इ) नामपदं प्रातिपदिकपरमिति भट्टोजीदीक्षितः अभिप्रैति। अत एव वैयाकरणमतोन्मज्जने एवमाह -

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः।। (का सं २५)

ई) भूषणकारः 'अथ नामार्थनिर्णयः' इति प्रकरणमेकं भूषणे रचयामास। तत्र प्रातिपदिकार्थ एव प्रस्तुतः।

उ) नागेशभट्टः' नामपदेन सुबन्तमेव ग्राह्यम्, क्रियाप्रधानमाख्यातं, द्रव्यप्रधानं नाम इति प्रशंसायां रूपप् (५-३-६६) इति सूत्रे भाष्ये अब्रवीत्।

ऊ) नमन्ति आख्यातशब्दे गुणभावनेन इति अथवा नमयन्ति स्वार्थं भावानां प्रतीति नामानि इति भूषणसारव्याख्याने तत्त्वदर्शिन्यां पेरि सूर्यनारायणशास्त्रिगुरुचरणाः।

सुबन्तेषु भासमानानां जाति-द्रव्य-लिङ्ग-संख्या-कारकाणां पदार्थाः यथाक्रमं विचार्यन्ते।

३. जातेर्वाच्यत्वप्रतिपादनम्

जायतेऽसाविति जातिः। जनी=प्रादुर्भावे इत्यस्माद्धातोः ण्यन्तात् 'स्त्रियां क्तिन् (३-३-९४) इति कर्मणि क्तिन् प्रत्ययः (जन् + णिच्+ क्तिन्)। ककारनकारयोः इत्संज्ञायां लोपः,णेरनिटीति णिलोपः,जनिवध्योश्च इति निषेधान्न वृद्धिः, जन् + ति इति स्थिते अनुनासिकस्य क्विझलोः क्ङिति (६-४-१५) इत्यनेन उपधादीर्घः, अनुदात्तोपदेशवनतितनोत्यादी-

नामनुनासिकलोपो झलि क्ङिति (६-४-३७) इत्यनेन नकारलोपः कृदन्तत्वेन प्रातिपदिकसंज्ञा, जातिरिति भवति। अवयवार्थो नात्र विवक्ष्यते, जाति र्नाम प्रवृत्तिनिमित्तम् इत्यर्थः। निखिलगोवृत्तिगोत्वरूपजातेरेकत्वेन तादृशजात्याश्रयशक्तेरेकत्वेन लाघवम्। यद्यपि शक्तिग्राहकशिरोमणिना व्यवहारेण नयनाऽनयनाद्यात्मकेन व्यक्तावेव शक्तिग्रहो बोध्यते। तथापि व्यक्तीनामानन्त्यात्तत्र शक्तिग्रहासम्भवः, अनेकव्यक्तिरूपाश्रयभेदभिन्न-नानाशक्तिकल्पने गौरवात्। अतः प्रथमतो व्यक्तौ गृहीताशक्ति र्जातौ विश्राम्यति।

व्यक्तिवच्यतावादेऽपि जातेर्वाच्यत्वमावश्यकम्। शुद्धव्यक्ते र्वाच्यत्वे प्रतिव्यक्ति शक्तिस्वीकारे आनन्त्यम्। एकव्यक्तौ तत्स्वीकारे व्यभिचारः। अत स्तद्दोषवारणाय जातावपि शक्तिरास्थेया। एवं जातिविशिष्टव्यक्तेर्वाच्यत्वा पेक्षया प्रथमतो ज्ञातायाः जातेरेव वाच्यत्वं 'नागृहीतविशेषणाबुद्धिः विशेष्य (विशिष्टेषूपजायते) उपजायते 'इति न्यायात्। व्यक्तिबोधस्तु लक्षणया। भाष्यसम्मतोऽयं पक्षः। अत्र च प्रमाणम् - सवर्णेऽण्ग्रहणमपरिभाष्यमाकृति-ग्रहणात् इति अइउण् सूत्रस्थम्, आकृतिं वाजप्यायनः' इति सरूपसूत्रस्थं च भाष्यम्।

४ वाक्यपदीयकाराणामाशयः

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु ।। (वा द्वि ११९)

अस्यार्थः - सर्वशब्दानामर्थः = आकारविशेषपरामर्शशून्यमर्थ-सामान्यम्, वाच्यमस्तीति केचिदाहुः। इति = एतत्, सर्वशब्दानां प्रत्याय्यलक्षणम् - प्रत्याय्यस्य वाच्यस्य, लक्षणम् = स्वरूपं बोद्धव्यम् । एतच्च प्रत्याय्य लक्षणमपरामृष्टाकारविशेषमर्थसामान्यं गवादिषु = गवादिपदेषु, अपूर्वदेवतास्वर्गैः = अपूर्वदेवतास्वर्गपदार्थैः, समम्=अपरामृष्टाकारविशेषत्वेन सदृशम्।

केचन एवं वदन्ति - गवादिपदैराकारविशेषः प्रतीयते ,तत्र पूर्वं स्मृत्युपस्थापिताकारविशेषस्य 'निर्विशेषं न सामान्यम्' इति न्यायेन नान्तरीयकतया भासत इति बोद्धव्यम् । यद्याकारविशेषः पदार्थः स्यात् तदाऽपूर्वशब्दाद्, देवताशब्दात् स्वर्गशब्दादश्वगवादिशब्दवदाकारविशेषप्रथनं स्यात्। यतश्च तेभ्यो नास्त्याकारादिप्रथनमतोऽर्थसामान्यमेव सर्वैः शब्दैः प्रत्याय्यत इति युक्तम्। एवञ्च गवादिपदेषु अर्थसामान्यमेव वाच्यम्, आकारविशेषस्तु 'अयं गौः' इत्याप्तोपदेशेन सङ्केतग्रहेऽनुभूतस्य स्मृत्या नान्तरीयकतया प्रथते, विशेषाविनाभावित्वात् सामान्यस्य, अपूर्वादिपदार्थानान्तु चोदनामात्रगम्यत्वेनऽऽकारादिविशेषवत्तया प्रागननुभूतत्वेन न तथाऽपूर्वादिपदेभ्यः प्रथनम्।

अपरे एवं वदन्ति -

प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः ।
न स शब्दस्य विषयः स हि यत्नान्तराश्रयः ।। वा द्वि १२० ।

यदा गोशब्दप्रयोगं सास्नादिमत्स्वेव भूयो भूयः पश्यति तद्दर्शनाभ्यासाच्च यस्तत्राकारपरिग्रहः स शब्दस्य प्रत्ययो न भवति, किन्तु तत्र स आकारविशेषः प्रयोगदर्शनाभ्यासरूपेण यत्नान्तरेण निमित्तभूतेन शब्दावगम्यातिरिक्तेन रूपेण प्रथते। ततश्च प्रयोगदर्शनाभ्यासरूपोऽसावाकार-विशेषावग्रहहेतु र्यतः शब्दव्यापारो न भवत्यतः शब्दस्यार्थसामान्यमेव जात्यादिरूपमपरामृष्टाकारविशेषं वाच्यं युक्तम् इति।

अन्ये एवं ब्रुवते -

केचिद्भेदाः प्रकाश्यन्ते शब्दैस्तदभिधायिभिः।
अनुनिष्पादिनः कांश्चिच्छब्दार्थ इति मन्वते ।। वा द्वि १२१ ।।

केचिद् भेदाः जात्यादयः सामान्यरूपाः, तदभिधायिभिः = आकृत्यधिकरणन्यायेन जात्याद्यभिधायिभिः शब्दैः प्रकाश्यन्ते, शब्दवाच्याः।

कांश्चित्त्वनुनिष्पादिनो जात्यादिरूपार्थसामान्यप्रत्ययानन्तरं प्रतीयमानान् जात्यादिरूपस्यार्थसामान्यस्याभिव्यक्तौ साहचर्येण प्रयोजकान् आकारविशेषान् अप्यन्ये तत्प्रत्ययस्य शब्दान्वय - व्यतिरेकानुविधानं मत्वा शब्दार्थ इति मन्वते । अत्र शब्दैर्जात्यादिरूपस्यार्थसामान्यस्यैव भानम्, लाघवात्, प्रथमोपस्थितत्वाद्, अव्यभिचारित्वाच्च तत्रैव शब्दानां सङ्केतस्वीकारात् । शब्दाद् जात्यादिप्रत्यये जातेऽनुनिष्पादिन्याकारविशेषप्रतीतिस्तु जात्यादि-रूपेणार्थसामान्येन सहाऽकारविशेषस्य व्यङ्ग्यव्यञ्जकभावसम्बन्धमूलिका स्मृतिरेव।

इतरे एवं गदन्ति -

जातेः प्रत्यायके शब्दे या व्यक्तिरनुषङ्गिणी।
न तद्व्यक्तिगतान् भेदान् जातिशब्दोऽवलम्बते।। वा द्वि १२२ ।।

अत्र जातेरित्यस्य प्रत्यायक अनुषङ्गिणी चेत्युभयत्रापि तन्त्रेण आवृत्त्या वा सम्बन्धः। जातेः प्रत्यायके शब्दे या जातेरनुषङ्गिणी, या व्यक्तिः प्रतीयत इति शेषः। तद्व्यक्तिगतान् भेदान् जातिशब्दः, जातिवाचकत्वादेव, नावलम्बते = वाच्यतया नाश्रयति। जातिशब्दा जातिमात्रं प्रत्याययन्ति। तत्र व्यक्तिस्तु जातेः शब्दात्प्रतीयमानायाः अनुषङ्गिणी = नियमेन सम्बद्धा इति निरधिकरणायाः जातेरसम्भवादिति कृत्वा नान्तरीयकतया प्रतीयते। अत स्तद्व्यक्तिगतान् आकारविशेषान् जातिः पदार्थ इति पक्षे जातिवाचकः शब्दो वाच्यतया नाश्रयति। अत्र दृष्टान्ततया एषा कारिका प्रदत्ता -

घटादीनां न चाकारान् प्रत्याययति वाचकः।
वस्तुमात्रनिवेशित्वात् तद्गति र्नान्तरीयकी।। वा द्वि १२३ ।।

घटादीनां पृथुबुध्नोदराकारादिरूपसामान्यवत्तया प्रसिद्धानाम्, आकारान् =आकारविशेषान्, घटादीनां वाचकश्शब्दः, न प्रत्याययति = न बोधयति। घटादिवाचकशब्दस्य वस्तुमात्रनिवेशित्वात् पृथुबुध्नोदराकाररूप-

सामान्यमात्रे सङ्केतितत्वात्। न हि सकलविशेषसहितमर्थं शब्दः प्रत्याययितुमलम्, तत्रासङ्केतितत्वात्। अतो घटादिवाचकशब्देषु प्रयुक्तेष्वाकारविशेषावगति र्नान्तरीयकी प्रागुक्तरीत्याऽनुनिष्पादिन्येवेति बोध्यम्।

केचित्तु एवं ब्रुवन्ति -

समुदायोऽभिधेयो वाऽप्यविकल्पसमुच्चयः। वा द्वि १२६ ।।

यद्याकारसमुदायं समुच्चितमेव पदं प्रत्याययति, तर्हि बहुवचनमेव तत्र स्यात्, दृश्यते चैकवचनमपि। अथ विकल्पितमेव प्रत्याययति, तदा बहूनामेकवचनानां वा शब्दोत्तराणां प्रयोगरूपो वचनविकल्पः स्यादित्याशङ्क्याह- अविकल्पसमुच्चय इति। अविद्यमानौ विकल्पसमुच्चयौ यस्यासौ = तथाभूतः समुदाय स्तस्माच्छब्दात्प्रतीयते।

केचन एवं भाषन्ते -

असत्यो वाऽपि संसर्गः शब्दार्थः कैश्चिदिष्यते।। वा द्वि १२६ ।।

वा = अथवा, संसर्गः = घटादीनां व्यक्तीनां घटत्वजात्यादिसंसर्गः, असत्योऽपि= घटादिपदार्थव्यतिरेकेण, घटत्वजात्यादिसंसर्गस्यानुपलम्भात्, असत्यभूत एव शब्दार्थः = घटादिशब्दार्थः कैश्चिदिष्यते।

घटादीनां घटत्वजात्यादिसंसर्गो घटादिशब्दैरुच्यत इति केचिदिच्छन्ति। घटादिपदार्थव्यतिरेकेण च घटत्वजात्यादिसंसर्गस्य प्रमाणेनानुपलम्भात्। स चासत्यभूत एवोच्यते। जाति र्हि अपोहातिरिक्ता वास्तवी बौद्धै र्न मन्यते, अद्वैतिभिरपि जाति र्नाभ्युपेयते। जातिगुणक्रियासमूह एव च द्रव्यमिति सांख्याः। एवञ्च घटादिव्यक्तौ जात्यादिसंसर्गोऽसत्यभूत एवोच्यते घटादिशब्दैः। तस्मात्तस्य संसर्गस्याश्रयीभूतो घटादिपदार्थः स्वलक्षण एव सत्यभूत इति तेषां हृदयम्।

अन्ये एवं मन्यन्ते -

शब्दो वाप्यभिजल्पत्वमागतो याति वाच्यताम्। वा द्वि १२७ ।

वा=अथवा, शब्दोऽपि=शब्दस्वरूपमेव, अभिजल्प्यत इत्यभिजल्पः

कर्मणि घञ्, अभिजल्पविषयत्वम्। अभिजल्पश्च शब्दार्थयोरितरेतराध्यासरूपः। वाच्यताम् = शब्दार्थाभिधेयतां याति। शब्दार्थयोः परस्पराध्यास-रूपाभिजल्पविषयीभूतं शब्दस्वरूपमेवाकृत्यधिकरणन्यायेन प्रवृत्तिनिमित्ततया शब्दस्य वाच्यं भवति।

अभिजल्पस्वरूपमेवमाह -

सोऽयमित्यभिसम्बन्धाद् रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ।। वा द्वि १२८ ।।

सोऽयमित्यभिसम्बन्धोऽध्यासाख्योऽभिजल्प उच्यते। यदा च पदार्थस्वरूपं शब्दस्वरूपेणाच्छादितमिव तेनाध्यासेन तादात्म्येन प्रत्याय्यते, तदाऽभिजल्पविषयत्वाच्छब्दोऽपि अभिजल्प उच्यते।

जातिमात्रवादिन एवं वदन्ति -

संस्थानवर्णावयवै र्वा विशिष्टे यः प्रयुज्यते।
शब्दो न तस्यावयवे प्रवृत्तिरुपलभ्यते ।। वा द्वि १५५ ।।

नन्वाकारवाचकानां स्थूलह्रस्वकर्बुरशबलादीनां शब्दानां किमाकारादिवाचकत्वं नाङ्गीकार्यमेवेत्याशङ्क्याऽह - संस्थानेति। स्वशब्दैराकारादय उच्यन्त एवेति न सर्वत्र वयं तदप्रतीतिं ब्रूमः, यद्धि प्रयोजकं शब्दस्य तदेव तस्य वाच्यम् (यच्छब्दस्य यत्प्रयोजकं = प्रयोगनिमित्तम्, प्रवृत्तिनिमित्तमिति यावत् तदेव तस्य शब्दस्य वाच्यम्) अन्यत्तु नान्तरीयकतया प्रतीयत इति ब्रूमः। एवं चाकारादिवाचकशब्दानां, नावयवमात्रे प्रवृत्तिरङ्गीकार्या, नान्तरीयकतया प्रतीयमानत्वेऽप्यवाच्यत्वात्। अतः परिमण्डलादिशब्दैः अर्थस्य विशेषा उच्यन्ते। गोघटादिशब्दैस्तु विशेषा नान्तरीयकतया प्रतीयमाना अपि नोच्यते, किन्तु गोत्वघटत्वादिरूपं सामान्यमात्रमिति व्यवस्थित एव पन्थाः, न त्वाकारादयो विशेषाः सर्वथाऽवाच्याः।

५. जातिविषये कैयटाशयः

पस्पशाह्निके किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम् ? इति भाष्यव्याख्यानसन्दर्भे कैयट एवमाह - तत्र जातिवादिन आहुः - जातिरेव शब्देन प्रतिपाद्यते, व्यक्तीनामानन्त्यात्सम्बन्धग्रहणासम्भवात्। सा च जातिः सर्वव्यक्तिष्वेकाकारप्रत्ययदर्शनादस्तीत्यवसीयते। तत्र गवादयः शब्दा भिन्नद्रव्यसमवेतां जातिमभिदधति। तस्यां प्रतीतायां तदावेशात्तदवच्छिन्नं द्रव्यं प्रतीयते। शुक्लादयः शब्दाः गुणसमवेतां जातिमाचक्षते। गुणे तु तत्सम्बन्धात् प्रत्ययः, द्रव्ये सम्बन्धिसम्बन्धात्। संज्ञाशब्दानामप्युत्पत्ति-प्रभृत्याविनाशात् पिण्डस्य कौमारयौवनाद्यवस्थाभेदेऽपि स एवायमित्यभिन्नप्रत्ययनिमित्ता डित्थत्वादिका जातिर्वाच्या। क्रियास्वपि जाति र्विद्यते, सैव धातुवाच्या । पठति - पठतः - पठन्ति इत्यादेरभिन्नस्य प्रत्ययस्य सद्भावात्तन्निमित्तजात्यभ्युपगमः।

प्रसङ्गवशात् भाष्योक्तानि जातिलक्षणानि व्याख्यायन्ते।

६. भाष्योक्तजातिलक्षणानि

अ) भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतम् - समानानां भावः - सामान्यम्। (जातिर्जातं च सामान्यम् इत्यमरः) पस्पशाह्निकं भाष्यम्।

आ) आकृतिग्रहणा जातिः लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ।।

इ). प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः।
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः।।
(जातेरस्त्रीविषयादयोपधात् ४-१-६३)

ई) जननेन या प्राप्यते सा जातिः। (अतिशायने तमबिष्ठनौ ५-३-५५)

उ) आविष्टलिङ्गा जातिः। (विशेषणानां चाजातेः १-२-५२)

ऊ) असर्वलिङ्गा जातिः। (आकडारादेका संज्ञा १-४-१)

एवं जातेः षट् लक्षणानि भाष्ये प्रतिपादितानि।

७. प्रथमलक्षणस्याभिप्रायः

भिन्नेषु गोषु अभिन्नं, छिन्नेषु तेष्वच्छिन्नं यत् सामान्यं सा जातिः। यथा गोत्वादिकम्। अत्र सामान्यशब्दः गवादिव्यक्तिवृत्तिधर्मपरो भावप्रधाननिर्देशात्, भूतमित्यस्य प्राप्तमित्यर्थ इति सामान्यभूतमित्यस्य सामान्यरूपमित्यर्थः। भिन्नेष्वभिन्नमित्यनेन जातेरेकत्वम्, अनेकसमवेतत्वं, तथा छिन्नेष्वच्छिन्नमित्यनेन नित्यत्वञ्च सूचितम्। नित्यत्वकथनात् संयोगनिरासः। एवञ्च कणादोक्तं नित्यमेकमनेकानुगतं सामान्यमिति लक्षणं भाष्यकृद्भिः असूच्यत।

८. द्वितीयलक्षणस्याभिप्रायः

एतल्लक्षणविषये भट्टोजीदीक्षितस्याभिप्रायः - आकृतिग्रहणा जातिः --- इत्यादि कारिकया त्रिणि लक्षणानि प्रतिपाद्यन्ते। तानि यथा -

१ आकृतिग्रहणा जातिः ।

२ लिङ्गानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या ।

३ गोत्रं च चरणैः सह । इति ।

१. आकृतिग्रहणा जातिः

आङ् पूर्वक कृञ् धातोः 'स्त्रियां क्तिन्'(३-३-९४) इति क्तिनि आकृतिः इति रूपं भवति। ग्रह उपादाने इति धातोः गृह्यते अनेनेति करणे 'करणाधिकरणयोश्च'(३-३-११७) इति ल्युट्, युवोरनाकौ(१-१-७) इत्यनेन यु इत्यस्य अनादेशः, अट्कुप्वाङ्नुम्व्यवायेऽपि'(८-४-२) इत्यनेन णत्वं, कृदन्तत्वेन प्रातिपदिकसंज्ञायां सुः, तस्य नपुंसके अमादेशः, पूर्वरूपं ग्रहण[1]मिति रूपं भवति। ग्रहणम् = व्यञ्जकम् इत्यर्थः। आकृतिः ग्रहणं

१. ग्रहणशब्दस्य करणल्युडन्तत्वेन आकृतिशब्दसामानाधिकरण्याय स्त्रीत्वे टिड्ढाणञ्-'इत्यादिना ङीपि सति' आकृतिः ग्रहणी यस्याः सा इति बहुव्रीहिसमासे नद्यृतश्च इति कप् समासान्तः, आकृतिग्रहणी +क इति स्थिते केऽणः इति प्राप्तस्य ह्रस्वस्य न कपि इति निषेधः, एवञ्च आकृतिग्रहणीका इति प्राप्नोति। भगवता भाष्यकारेण आकृतिग्रहणेति प्रयुक्तत्वेन ग्रहणमित्यत्र सामान्ये नपुंसकमिति समाधेयम्।

यस्याः सा = आकृतिग्रहणा इति बहुव्रीहिसमासः। समासे ग्रहणशब्दस्य उपसर्जनत्वात् टिदन्तत्वेऽपि अनुपसर्जनाधिकार- स्थेन टिड्ढाणञ् -- इत्यादिना ङीब् न भवति। आकृतिः = अवयवसन्निवेशविशेषः। नात्र आकृतिशब्दो जातिपरः, आत्माश्रयप्रसङ्गात्। तथा चानुगतसंस्थानव्यङ्ग्या इति लभ्यते। सर्वासु घटादितत्तद्व्यक्तिषु एकरूपतत्तदाकारव्यङ्ग्या इति लभ्यते । 'तटी' इत्यस्योदाहरणं भवति। जलसमीपप्रदेश आकृतिविशिष्टस्तटः, अतः तटत्वमाकृतिव्यङ्ग्यत्वा ज्जाति र्भवति। अत स्तटशब्दाज् 'जातेरस्त्रीविषयादयोपधात् (४-१-६३) इति ङीष्, 'तटी' इति भवति। युवत्वादिकमपि आकृतिव्यङ्ग्यत्वाज्जातिरेव।

२. लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या

पूर्वोक्तलक्षणस्वीकारे वृषलत्वं जाति र्न भवति। तत्र विद्यमानावयवसन्निवेशस्य मनुष्यसाधारणत्वेन तद्व्यङ्ग्यत्वाभावात्। अत स्तेषामपि जातित्वसम्पादनार्थमिदं लक्षणमारब्धम्। सर्वभाक् इत्यस्य सर्वाणि भजति 'इति विग्रहे' भजो ण्विः इति ण्विः। अत्र सर्वाणीत्यस्य कानि? इत्याकाङ्क्षायां 'लिङ्गानि' इत्यस्यापेक्षाऽस्ति ,अतः सापेक्षत्वात् सापेक्षमसमर्थवदिति वचनात् कथमुपपदसमासः? कथं वा कृत्प्रत्ययस्य प्रादुर्भाव इति चेद्-

उच्यते, भगवता भाष्यकारेण प्रयुक्तत्वाद् गमकत्वेन कृत्प्रत्ययो भवति। भज धात्वर्थस्य नञर्थेऽन्वयेन असामर्थ्येऽपि समासो भवति। एवञ्च सर्वाणि लिङ्गानि न भजतीत्यर्थः। सकृदाख्यातनिर्ग्राह्या इत्यत्र सकृदित्यतः 'पूर्वमेकस्यां व्यक्तौ इत्यध्याहारः कर्तव्यः। सकृदितिरूपनिष्पत्तिरेवं भवति। एकशब्दात् क्रियाभ्यावृत्तिगणने 'एकस्य सकृच्च (५-४-१९) इत्यनेन सुच् प्रत्ययः, प्रकृतेः सकृदित्यादेशोऽपि भवति, सकृत् + सु इत्यस्य तद्धितान्तत्वेन प्रातिपदिकसंज्ञायां सुः, सकृत् + स् + स् 'अव्ययादाप्सुपः'इत्यनेन सोः लुक्, संयोगान्तस्य लोपः इत्यनेन सुचो

लोपः। एवञ्च सकृदित्यस्य एकवारमित्यर्थः। विशिष्टाद् एकस्यां व्यक्तौ एकवारमित्यर्थः पर्यवस्यति।

आख्यातमित्यत्र आङ्पूर्वक चक्षिङ् धातोः भावे क्तप्रत्ययः चक्षिङः ख्याञ् (२-४-५४) इत्यनेन ख्याञादेशः। आख्यातपदस्योपदेश इत्यर्थः।

निर्ग्राह्येत्यत्र निरित्युपसर्गपूर्वकग्रहधातोः ऋहलोर्ण्यत् (३-१-१२४) इति ण्यत्प्रत्यये, कृदन्तत्वेन निरित्यस्य प्रादिसमासे, निर्ग्रह + ण्यत् 'अत उपधायाः इति उपधावृद्धौ, टापि निर्ग्राह्येति रूपं भवति। निरित्युपसर्गवशान्निर्ग्राह्येत्यस्य व्यक्त्यन्तरे कथनं विनापीत्यर्थः। निर्ग्राह्येत्यन्तर 'मन्या जातिः' इति पदमध्याहर्तव्यम्। तथा च 'असर्वलिङ्गत्वेन एकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्राह्या जातिः' इति फलति। अस्योदाहरणम् - वृषली। वृषलशब्दः असर्वलिङ्गो भवति, नपुंसकत्वाभावात्। एकस्यां वृषलव्यक्तौ वृषलत्वे कथिते तदपत्यसहोदरादौ कथनं विनापि सुग्रहत्वात् वृषलत्वं जाति र्भवति। ब्राह्मणविषये तु पितृपितामहादिषु ब्राह्मणत्वं जातिरिति वक्तुं शक्यते। परं पुत्रपौत्रादिषु ब्राह्मणत्वं न सुगमम्, ब्राह्मणात् क्षत्रियायामुत्पन्नस्य ब्राह्मणत्वाभावात्।

लक्षणे सत्यन्तनिवेशात् शुक्ला, बलाका इत्यत्र शुक्ला इत्यस्य 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इति कोशाद् विशेषनिघ्नतया त्रिलिङ्गत्वाद् असर्वलिङ्गत्वाभावात् शुक्लत्वं न जातिः। अनुगतसंस्थानव्य -ङ्ग्यत्वाभावान्न पूर्वलक्षणेनापि। विशेष्यदलनिवेशाद् 'देवदत्तः' इत्यादीनां संज्ञाशब्दत्वेन नपुंसकलिङ्गाभावेना- ऽसर्वलिङ्गत्वेऽपि सकृदाख्यातनिर्ग्राह्यत्वाभावा न्नातिव्याप्तिः।

३. गोत्रं च चरणैः सह

सहेत्यनन्तरं जातिरित्यनुषज्यते। गोत्रशब्देन अपत्यं विवक्षितं, न तु 'अपत्यं पौत्रप्रभृतिगोत्रम् (४-१-१६२) इति पारिभाषिकम्। यतः

अपत्याधिकारादन्यत्र लौकिकगोत्रग्रहणात्। प्रवराध्यायप्रसिद्धगोत्र मत्रापत्यम्। चरणशब्दः शाखाध्येतरि प्रसिद्धः। तथा चापत्यसाधारणगोत्र-प्रत्ययान्तं ,शाखाध्येतृवाचिप्रत्ययान्तं च जातिरिति लभ्यते।

औपगवी इत्यपत्यप्रत्ययान्तस्योदाहरणं भवति । उपगोरपत्यं स्त्री इत्यर्थे 'तस्यापत्यम् (४-१-९२) इत्यनेन अण्प्रत्ययः , उपगु +ङ्स् + अण् तद्धितेष्वचामादेः (७-२-११७) इत्यादिवृद्धिः औपगु +अ , ओर्गुणः (६-४-१४६) इत्यनेन उकारस्य गुणः ओकारः, औपगो + अ 'एचोऽयवायावः (६-१-७८) इति अवादेशः औपगव इति , अणन्तत्वेन 'टिड्ढाणञ्- - इत्यादिना ङीपि प्राप्ते , अनेन लक्षणेनापत्यप्रत्ययान्तत्वेन जातित्वात् 'जातेरस्त्रीविषयादयोपधात् (४-१-५३) इत्यनेन ङीष् भवति । यद्यपि ङीप्ङीषोः रूपे नास्ति वैलक्षण्यं ,परं स्वरे विशेषो विद्यते ।

कठी, कलापी,बह्वृची इति चरणस्योदाहरणानि भवन्ति । कठेन प्रोक्तमधीयाना (कलापेन प्रोक्तमधीयाना) इत्यर्थे 'कलापिवैशम्पायनान्ते-वासिभ्यश्च (४-३-१०४) इत्यनेन वैशम्पायनान्तेवासित्वाण्णिनिः, तस्य 'कठचरकाल्लुक् (४-३-१०७) इत्यनेन लुक्, ततः अध्येत्रर्थे 'तदधीते तद्वेद (४-२-५९) इत्यण्प्रत्ययः तस्य 'प्रोक्ताल्लुक् (४-२-६४) इत्यनेन लुक्, अनेन लक्षणेन चरणवाचकस्य जातित्वात् ङीष् भवति । ततः सुः, लोपश्च कठी, कलापी इति रूपे भवतः ।

बह्व्यः ऋचोऽध्येतव्याः यया सा इति बहुव्रीहिः । बह्वी +जस् , ऋच् +जस् इत्यलौकिके विग्रहवाक्ये 'अनृच्बह्वृचावध्येतर्येव' इति वचनात् 'ऋक्पूरब्धूः पथामानक्षे (५-४-७४) इति समासान्तः अप्रत्ययः (बह्वी +जस्, ऋच्+जस्, अ) सुपो धातुप्रातिपदिकयोः (२-४-७१) इत्यनेन जसोः लुक्, 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु (६-३-३४) इत्यनेन पुंवद्भावः, बह्वृच इति जाते चरणवाचकत्वात् जातित्वेन

जातिलक्षणङीष्, यस्येति च (६-४-१४८) इति अकारलोपः (बह्वृच् ई) विशिष्टात् सुप्रत्ययः, हल्ङ्यादिलोपः बह्वृची इति भवति ।

यद्यपि लोकेऽनुगताकारवेद्या, जननविशेषप्रयुक्ता चेति द्विधैव जाति र्दृश्यते । न तत्र गोत्रचरणा अन्तर्भवन्ति, तथापि शास्त्रे 'अतस्मिन् तच्छब्दस्तद्वाचिषु शब्देषु तत्तत्कार्यार्थः' इत्यभियुक्तोक्त्या गोत्रचरणानामपि जातिकार्याणि प्रतिपादितानि ।

ननु नडस्यापत्यं = नाडायनः 'नडादिभ्यः फक् (४-१-९९) इति फक्, स्त्रियां नाडायनी इति रूपे भवतः । नपुंसकस्याभावात् लिङ्गानाञ्च न सर्वभाक् इति द्वितीयलक्षणेनैव अपत्यप्रत्ययान्तानां जातित्वं वक्तुं शक्यते, किं तृतीयलक्षणेनेति चेद् -

उच्यते। गोत्रप्रत्ययान्ताः त्रिषु लिङ्गेषु विद्यन्ते । यथा - नाडायनं नपुंसकमिति दर्शनात् ।

९. लघुशब्देन्दुशेखरकाराशयः

जातेरस्त्रीविषयादयोपधात् (४-१-५३) इति सूत्रव्याख्यानसन्दर्भे नागेशभट्टः एवं लिलेख - परे तु आकृतिग्रहणेत्येव लक्षणम् । आकृतिपदमुपदेशोपलक्षणम् । आकृतिद्वारा, साक्षाद्वोपदेशेन ग्राह्या जातिरित्यर्थः इति ।

तेषामयमभिप्रायो भवितुमर्हति यत् निरुक्तकारिकया एकमेव लक्षणं बोध्यते । तच्च उपदेशग्राह्या जातिरिति । लोके, शास्त्रे च उपदेशो द्वेधा दृश्यते । १ साक्षात् २ आकृत्या । जातिग्राहकाणामेव साक्षादुपदेशग्राह्या इत्यत्रोपदेशपदेन ग्रहणम्। तेन शुक्लादिगुणानाम् 'अयं शुक्लः' इत्याद्युपदेशग्राह्यत्वेऽपि तादृशोपदेशस्य गुणग्राहकत्वेन जातिग्राहकत्वाभावान्नातिव्याप्तिः ।

१. साक्षादुपदेशस्योदारणं भवति -ब्राह्मणत्वम् । अयं ब्राह्मणः इति साक्षादुपदेशग्राह्यं ब्राह्मणत्वं जाति र्भवति ।

२. आकृत्योपदेशस्योदारणं भवति - गोत्वम् । सास्नालाङ्गूलादिविशिष्टा गौ; इत्याकृत्युपदेशग्राह्यं गोत्वं जाति र्भवति ।

तत्रैव यद्वेत्यादिना पक्षान्तरमप्यवोचत शेखरकारः । तथा हि - पूर्वोक्तलक्षणेन साक्षादाकृतिद्वारा वोपदेशग्राह्यत्वं जाते, राकृतिपदमुपदेशोपलक्षणमित्युक्तम्। यत्र तूपदेशमन्तराप्याकृतिदर्शनमात्रेणैव जातिग्रहणं तत्र जातिकार्यासिद्धिः, अत् स्तेषामपि जातिकार्यसिद्ध्यर्थं यद्वेत्यादिना आकृतिग्रहणं जातिग्राहकोपदेशस्याप्युपलक्षणमित्युक्तम्। एवञ्च 'आकृत्युपदेशान्यतरग्राह्या जाति' रिति लक्षणं सिध्यति।

ननु आकृतिग्रहणा जातिः इति लक्षणं कथं संगच्छते जातिलक्षणे जातेः (आकृतेः) प्रवेशा दात्माश्रयो भवति इति चेत् -

उच्यते। लक्षणघटकमाकृतिपदं जातिग्राहकस्योपलक्षणम्, न तु तस्य विशेषणत्व मतो नात्माश्रयः।

लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या इति न लक्षणान्तरम्। विशेषणानां चाऽजातेः (१-२-५२) इति सूत्रे भाष्ये आविष्टलिङ्गा जातिः इत्यस्यात्रानुवादः कृतः। तस्य चायमर्थः - आविष्टं लिङ्गं यया सा= आविष्टलिङ्गा, नियतलिङ्गेत्यर्थः इति कैयटः। सर्वत्र सर्षेषां लिङ्गानां सद्भावेऽपि केनचिच्छब्देन किंचिल्लिङ्गं प्रत्याययतेति शब्दविशेषापेक्षया आविष्टलिङ्गत्वमुच्यते। यः शब्दो यल्लिङ्गमुपादाय प्रवर्तते तल्लिङ्गमुत्पत्ति प्रभृत्याविनाशं न जहाति। आविष्टमित्यस्य विशिष्यगृहीतमित्यर्थ इति तद्व्याख्याने उद्द्योते नागेशभट्टः। जातिशब्दाः अनियतलिङ्गा अपि दृश्यन्ते, तथाऽपि प्रकृताभिप्रायेण प्रदीपकारेण समन्वयः कृत इत्यलिखत्।

जातेरुत्पत्तिविनाशायोगात् शब्दव्यवहारगतावुत्पत्तिविनाशौ गृह्येते। तेनाऽसंसारं यावच्छब्दव्यवहार स्तावज्जातेः नियतलिङ्गत्वमित्यर्थः। नियतलिङ्गशब्दमात्रार्थस्य जातिरित्युपलक्षणम्। एतच्च जातिस्वरूपकथनमेव, न तु जातिलक्षणमिति भाष्यकाराणामाशयः। तृतीयं 'गोत्रं च चरणैः सह' इत्यातिदेशिकमेव इति कौमुदीकारेणा[1]ऽप्युक्तम्। अतो नेदं लक्षणान्तरम्।

१०. प्रादुर्भावविनाशाभ्यां - - -इत्यस्य विवरणम्

जातेरस्त्रीविषयादयोपधात् (४-१-६३) इति सूत्रे भाष्येऽपर आह इत्यनेन लक्षणान्तरमुक्तम्। यथा -

प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः।
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः।।

अस्या अयमर्थः - सत्त्वस्य = द्रव्यस्य, प्रादुर्भावविनाशाभ्याम् = उत्पत्तिविनाशाभ्याम्, या आविर्भावतिरोभावौ प्राप्नोति सा जातिरित्यर्थः। सर्वं लिङ्गं यस्याः सा = सर्वलिङ्गा, न सर्वलिङ्गा = असर्वलिङ्गा, ताम् =असर्वलिङ्गाम्। बहवोऽर्थाः यस्याः सा = बह्वर्था, ताम् =बह्वर्थां जातिं कवयो विदुः। एवञ्च सत्त्वस्य गुणैः सह युगपत् प्रादुर्भावविनाशाभ्यां (संबन्धः) बह्वर्थाम् असर्वलिङ्गां तां जातिं विदुः। अत्र प्रादुर्भावविनाशाभ्यामित्यनेन जातिलक्षणं बोध्यते। अनेन लक्षणेन गोत्व -घटत्वादीनां जातित्वं सिद्ध्यति।

कणादोक्तेन नित्यमेकमनेकानुगतं सामान्यमिति लक्षणेन आत्मनः जातित्वं सिद्ध्यति। आकृतिग्रहणा जातिरिति लक्षणेनापि आत्मनः जातित्वं लभ्यते, आकृतिपदस्योपदेशोपलक्षकत्वात्। प्रादुर्भावविनाशाभ्यामिति लक्षणस्वीकारे आत्मनो नित्यत्वाद् उत्पत्तिविनाशासम्भवेन कथं जातित्वमतो लक्षणमेतन्न सङ्गच्छत इति चेद् -उच्यते। लक्षणे प्रादुर्भावविनाशाभ्यामिति

---

१. अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः।

यावद्द्रव्यभाविनीत्यस्योपलक्षणम्। यावद्द्रव्यभावित्वेनात्मत्वं जाति र्भवति। आत्मत्वस्य जातित्वं नैयायिकरीत्या। अयावद् द्रव्यभावित्वेन युवत्वमेतल्लक्षणरीत्या जाति र्न भवति। लक्षणे गुणैः युगपद् द्रव्येण सम्बध्यत इत्यत्र गुणैः इति 'प्रकृत्यादिभ्यः उपसंख्यानमित्यनेन तृतीया, द्रव्येणेत्यत्र 'सहयुक्तेऽप्रधाने (२-३-१९) इत्यनेन तृतीया। एवञ्च गुणैरेककाले द्रव्येण सह सम्बध्यत इत्यर्थः। गुणैः युगपद्द्रव्येण सम्बध्यत इति स्वरूपकथनमेव, न तस्य लक्षणघटकत्वम्। असर्वलिङ्गमित्येतदनुवादकमेव, न तु लक्षणान्तरम्। बह्वर्थामित्यत्र अर्थशब्दो विषयवाची, न प्रयोजनवाची, ततश्च बहुव्यक्तिव्यापिनी, भिन्नकालिक नानाव्यक्तिवृत्तित्वाभाव इति पर्यवस्यति। तेनावस्थाभेदेन द्रव्यभेदाङ्गीकारेऽपि देवदत्तत्वादीनां न जातित्वम्। शुक्लादिगुणानाम् अयावद्द्रव्यभावित्वेन जातित्वाप्रसक्त्या न तद्व्यावृत्त्यर्थमसर्वलिङ्गमिति। एतल्लक्षणैकवाक्यतया पूर्वलक्षणेऽपि 'लिङ्गानां च न सर्वभाक्' इत्यस्यानुवादमात्रार्थकत्वमेव। भाष्यप्रामाण्यात् जातिवाचकानां त्रिलिङ्गत्वमप्रामाणिकम्। वृषलत्वादीनां यावद्द्रव्यभावित्वा ज्जातित्वं सिध्यति।

११ अयमत्र निष्कर्षः

अनयो र्द्वयोः मध्ये प्रथमलक्षणमेव भगवत्सम्मतम्। अत्र च प्रमाणं कुमारभार्यः इति रूपसिद्धिः। कुमारी भार्या यस्य सः इति बहुव्रीहौ 'कुमारी + सु, भार्या + सु इत्यलौकिकविग्रहे 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु (६-३-३४) इत्यनेन पुंवद्भावे 'जातेश्च (६-३-४१) इत्यनेन पुंवद्भावप्रतिषेधो भवति नवेति विचारे आकृतिग्रहणा जातिरिति प्रथमलक्षणेन जातित्वात् पुंवद्भावनिषेधे 'कुमारीभार्यः' इति, द्वितीयलक्षणेन कौमारस्यायावद्द्रव्यभावित्वेन जातित्वाभावात्पुंवद्भाव-निषेधाऽप्रवृत्तौ, 'कुमारभार्यः' इति भवति।

उक्तञ्च जातेरस्त्रीविषयादयोपधात् (४-१-६३) इति सूत्रे भाष्ये -

कः पुनरेतयोर्जातिलक्षणयो र्विशेषः ? यथा पूर्वं जातिलक्षणं तथा 'कुमारीभार्यः' इति भवितव्यम्। यथोत्तरं तथा - 'कुमारभार्यः' इति भवितव्यम् इति। अत एव लक्षणान्तरकथनवेलायाम् 'अपर आह' इत्युवाच भाष्यकारः।

१२. जननेन या प्राप्यते सा जातिः

अतिशायने तमबिष्ठनौ (५-३-५५) इति सूत्रे भाष्ये तमबिष्ठनौ जातिवाचकेभ्योऽपि प्राप्नुत इत्याशङ्क्य 'जाते र्नेति च वक्तव्यम्' इत्युक्त्वा, न वक्तव्यम्, जननेन या प्राप्यते सा जातिः 'न चैतस्यार्थस्य प्रकर्षापकर्षौ स्तः' इति।

ननु जातावपि प्रकर्षः सम्भवति। कथमिति चेत् -

उच्यते। यथा आश्रितगुणप्रकर्षाद् द्रव्यप्रकर्ष स्तथा लब्धप्रकर्षद्रव्यगतत्वेन जातेः प्रकर्षो युज्यते। अत्र जननेन प्राप्यत्वोक्त्या एकत्वं, नित्यत्वम्, अनेकवृत्तित्वञ्च भगवता सूचितम्। अयत्नलब्धत्वं जाते रनेन लक्षणेन। एवञ्च इदं लक्षणमपि भिन्नेष्वभिन्नमिति लक्षणतुल्यं भवति। केचित्तु - इदं लक्षणमद्वैतमतानुसारेण। तेषां मते ब्रह्मातिरिक्तं सर्वं जन्यमेव। ब्रह्मणस्तु निर्धर्मकत्वात् तत्र जातिरेव नास्ति। जीवानामपि उपाधिजन्यत्वेन विशिष्टानां जन्यत्वमेव इत्याहुः।

१३ आविष्टलिङ्गा जातिः

विशेषणानां चाऽजातेः (१-२-५३) इति सूत्रे भाष्ये 'विशेषणानां वचनं जातिनिवृत्त्यर्थम्' इत्युक्त्वा आविष्टलिङ्गा जातिः, यल्लिङ्गमुपादाय प्रवर्तते, उत्पत्तिप्रभृत्याविनाशा न्न च लिङ्गं जहाति' इत्युक्तम्। तत्र आविष्टलिङ्गमित्यस्य 'आविष्टं लिङ्गं यया सा = आविष्टलिङ्गा इति बहुव्रीहिः। नियतलिङ्गा इत्यर्थ इति कैयटः। एतल्लक्षणं न भवति, किन्तु जातेः स्वरूपबोधकम्।

१४ असर्वलिङ्गा जातिः

आकाडारादेका संज्ञा (१-४-१) इति सूत्रे भाष्ये 'समासकृत्तद्धिताव्ययसर्वनामाऽसर्वलिङ्गा जातिः' इति वार्तिके असर्वलिङ्गा जातिः इति जातिस्वरूपं प्रतिपादितम्। एतच्च न लक्षणान्तरम्, लिङ्गानां च न सर्वभागिति जातिस्वरूपस्यैव विवरणम्।

१५. निष्कृष्टं जातिलक्षणम्

वस्तुतस्तु 'भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नमिति पस्पशाह्निकस्थभाष्यबोधितं नित्यत्वे एकत्वे च सति अनेकानुगतत्वमिति जातिलक्षणमेव भगवत्सम्मतम्। एतच्च ब्राह्मणत्वघटत्वादिसाधारणम्। शुक्लादीनां नित्यत्वैकत्वमतेऽपि औपाधिकभेदेनानेकव्यवहाराद् एकत्वव्यवहाराभावाच्च न जातित्वम्। देवदत्तत्वं न जाति र्भवति एकस्मिन्नेवकालेऽनेकत्रसमवेतत्वाभावात्। 'गोत्रं च चरणैः सह' इति लक्षणेन बोधितानां जातित्वं नास्ति। तद्बोध्यानामेतल्लक्षणाघटकत्वात्। आरोपेण जातित्वस्वीकारे 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् (१-२-५७) इति सूत्रभाष्यविरोधः स्यात्। तत्रहि - इदमयुक्तं वर्तते। किमत्रायुक्तम् ? बहव स्तेऽर्था स्तत्र युक्तं बहुवचनम्। तदेकवचने शासितव्ये बहुवचनं शिष्यते, एतदयुक्तम्। बहुष्वेकवचनमिति नाम वक्तव्यम्। अत उत्तरं पठति - जात्याख्यायां सामान्याभिधानादैकार्थ्यम् (वा), जात्याख्यायां सामान्याभिधानादैकार्थ्यं भविष्यति। यत्तद्व्रीहौ व्रीहित्वं,गार्ग्ये गार्ग्यत्वं तदेकम्, तच्च विवक्षितम्, तस्यैकत्वादेकवचनं प्राप्नोत्ति। सूत्रारम्भसामर्थ्यात्तत्र यथा जातित्वारोपः, तथा 'गोत्रं च चरणैः सह' इत्यपि तयोस्तत्त्वारोपबोधकमेव। एवं रीत्या न डित्थादावारोपः, तत्र जातिकार्यादर्शनात्। युवत्वादीनां कार्यानुसारेण जातित्वारोपो व्यवस्थितः, अत स्तेषां कदाचिज्जातित्वं, कदाचिन्न। यथा - युवतितरामित्यत्र 'तसिलादिष्वाकृत्वसुचः' (६-३-३५) इति प्राप्तस्य पुंवद्भावस्य 'जातेश्च (६-३-४१) इत्यनेन निषेधः। अयञ्च प्रयोगः 'ङ्याप्प्रातिपदिकात्' (४-१-१) इति सूत्रे भाष्ये भगवता प्रयुक्तम्। 'युवजानिः' इत्यत्र वयोवाचकयुवतिशब्दस्य

पुंवद्भावः कृतः, जातेश्चेत्यस्याप्रवृत्त्या। तथा हि - युवतिः जाया यस्य सः इति विग्रहे युवति + सु, जाया + सु इत्यलौकिकविग्रहे बहुव्रीहिसमासः, 'जायाया निङ्' (५-४-१३४) इत्यनेन समासान्तो निङ्, स च ङित्त्वादन्तादेशः, 'सुपो धातुप्रातिपदिकयोः (२-४-७१) इति सुब्लुक्, युवति- जाय् + नि इति स्थिते 'स्त्रियाः पुंवद् -' इत्यादिना पुंवद्भावः, 'लोपो व्योर्वलि' इत्यनेन यलोपः, विशिष्टात् सुप्रत्ययः, रुत्वं विसर्गश्च। एवञ्च नित्यमेकमनेकानुगतं सामान्यमिति यज्जातिलक्षणं दर्शनान्तरीयैः प्रदर्शितं तदेव भाष्यकारः सूचयामास।

१६. अयमत्र सङ्ग्रहः

'आकृतिग्रहणा' इत्यंश एव जातिलक्षणबोधकः। 'लिङ्गानाञ्च न सर्वभाक्, सकृदाख्यात निर्ग्राह्या' इत्याकृतिग्रहणार्थकः शब्द इति स्वरूपनिर्देशपरः। गोत्रं च चरणैः सह इत्यतिदेशः।

प्रादुर्भावविनाशाभ्यां - इत्यादिकारिकापूर्वभागेन जातिलक्षणं बोध्यते। अवशिष्टभागेन तस्याः स्वरूपनिर्देशः कृतः। असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः' इत्यत्र विद्यमानस्य असर्वलिङ्गाम् इत्यस्य 'लिङ्गानां च न सर्वभाक्' इत्यस्य चैक एवार्थः। सकृदाख्यात निर्ग्राह्या' इत्यनेनैकत्वमनेकवृत्तित्वञ्चोक्तम्। बह्वर्थाम् इत्यनेन तदेवोक्तम्।

अत एव जातेरस्त्रीविषयादयोपधात् (४-१-६३) इति सूत्रे भाष्ये एतत्कारिकाद्वयमुक्त्वा' यथापूर्वं जातिलक्षणम्' इत्येकवचनं प्रयुक्तम्। त्रीणि लक्षणानि चेद् बहुवचनं प्रयुञ्जीत।

१७ निष्कृष्टविचारः

गो-तटत्वादयः आकृतिद्वारा उपदेशग्राह्यत्वेन यावद्द्रव्यभावित्वेन च जातयो भवन्ति। ब्राह्मणवृषलत्वादयः साक्षादुपदेशग्राह्यत्वेन यावद्द्रव्य-भावित्वेन च जातयो भवन्ति। देवदत्तः इत्यादिसंज्ञाशब्दानां न जातिकार्यम्। देवदत्तत्वादीनां समानकालिक यावद्द्रव्यभावित्वेऽपि बहुव्यक्तिवृत्तित्वाभावात्।

एवञ्च समानकालिकबहुव्यक्तिवृत्तित्वे सति यावद्द्रव्यभावित्वं जातिः। औपगवः, कठः, कलापः बह्वृच इत्यादीनामातिदेशिकं जातित्वम्।

अत्रेदं तत्त्वम् -पूर्वोक्तषट्सु भाष्योक्तवचनेषु द्वितीयलक्षणविषये दीक्षित -नागेशयोः मतभेदो दृश्यते। आकृतिग्रहणा जातिः इति कारिकया त्रीणि लक्षणानि प्रतिपाद्यन्त इति दीक्षितः। कारिकायाः प्रथमपादेनैव जातिलक्षणं बोध्यते, अवशिष्टेन भागेन जातिस्वरूपमेव विव्रियत इति नागेशभट्टः।

परिशीलयामश्चेत् कौमुदीकारानुसारेण लक्षणत्रयं वक्तव्यमिति चेत् - लिङ्गानाञ्च न सर्वभाक्, सकृदाख्यातनिर्ग्राह्या' इत्यनेन असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिरित्यर्थलाभाय बहूनां पदानामध्याहारः, विद्यमानानां पदानामन्यार्थकल्पनापि कर्तव्या। यथा -

१ सकृदित्यतः पूर्वमेकस्यां व्यक्तौ' इति

२ आख्यातपदस्य उपदेश इत्यर्थः।

३ निर्ग्राह्येत्यस्य व्यक्त्यन्तरे कथनं विनापीत्यर्थः।

४ अन्याजातिरिति पदस्याध्याहारः। इति

एतत्सर्वं कृत्वा वृषलादिशब्दानां जातिप्रयुक्तकार्यं, शुक्लादिगुणवाचकानां तदभावोऽपि साध्यते। तच्च यावद्द्रव्यभावित्वं जातिरिति चतुर्थलक्षणेन वृषलत्वादीनां जातित्वं, शुक्लत्वादीनां न आकृतिग्रहणेत्यनेन जातिग्राहकोपलक्षकत्वात्। गोत्रं च चरणैः सह इति तु आतिदेशिकमेव।

नागेशभट्टः आकृतिग्रहणेति उपदेशोपलक्षणमित्युक्त्वा अव्याप्त्यतिव्याप्तीः परिहृतवान्। उपलक्षणमिति कथनन्तु चतुर्णां लक्षणानामाभिन्नार्थकत्वसम्पादनार्थम्। अतो दोषाय न भवति। कारिकया एकमेव लक्षणं बोध्यत इत्यत्र प्रमाणमपि पूर्वं प्रदर्शितम्।

	१	२	३	४
जातिलक्षणम्	भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नम्	आकृति-ग्रहणा जातिः	प्रादुर्भाव-विनाशाभ्यां सत्त्वस्य	जननेन या प्राप्यते सा जातिः
जातिस्वरूपम्	-	लिङ्गानां च न सर्वभाक्। सकृदाख्यात-निर्गाह्या जातिः ।	युगपद्गुणैः। असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः (अनुवादकम्)	-
आतिदेशिकम्/ आरोपितम्	-	गोत्रं च चरणैः सह	-	-

कस्य कथं जातित्वमितिविषये दीक्षित-ना

शब्दः	दीक्षिताशयः	नागेशाशयः
तटः	आकृतिग्रहणा	आकृत्युपदेशग्राह्या
वृषलः	लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या	साक्षादुपदेशग्राह्या (यावद्द्रव्यभावित्वात्)
ब्राह्मणः	लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या	साक्षादुपदेशग्राह्या (यावद्द्रव्यभावित्वात्)
औपगवः	गोत्रं च चरणैः सह (आरोपितजातिः)	जातित्वं नास्ति
देवदत्तः	सकृदिति कथनात्	अनेकानुगतित्वाभावात् (समानकालिकबहुव्यक्ति वृत्तित्वाभावात्)
शुक्लः	असर्वलिङ्गत्वात्	जातिग्राहकोपदेशोप-लक्षकत्वात् अयं गुणग्राहकः।
युवतिः	आकृतिव्यङ्ग्यत्वात्	आरोपितजातिः।

१८. भाष्ये द्रव्यपदार्थविचारः

अतिशायने तमबिष्ठनौ (५-३-५५) इति सूत्रे भाष्ये 'कः पुनर्द्रव्याप्रातिपदिकार्थः? द्रव्यम् । इत्युक्तम् , अनेन भाष्येण द्रव्यस्य प्रातिपदिकार्थत्वं स्पष्टं प्रतीयते।

द्रव्यविषये' तस्य भावस्त्वतलौ (५-१-११९) इति सूत्रे भाष्ये 'किं पुनर्द्रव्यम्, के गुणाः? शब्दस्पर्शरूप- रसगन्धाः गुणाः ततोऽन्यत् द्रव्यम्। किं पुनरन्यच्छब्दादिभ्यो द्रव्यम्, आहोस्विदनन्यत्?' गुणस्यायं भावाद्द्रव्ये शब्दनिवेशं कुर्वन्ख्यापयत्यन्यच्छब्दादिभ्यो द्रव्यम्, न ह्यन्यदुपलभ्यते। पशौ खल्वपि विशासितस्य पर्णशते न्यस्तस्य नाऽन्यच्छब्दादिभ्य उपलभ्यते इत्युक्तम्। तत्र प्रदीपव्याख्याने कौयट एवमभणत् - शब्दस्पर्शेति लक्षणमुपलक्षणम्। पराश्रयस्य द्रव्यस्य भेदकस्य जात्यादेरिह गुणत्वेनाभिमतत्वात्। विशेष्यस्य सर्वनामप्रत्यवमृश्यस्य द्रव्यत्वेन तत एतदुक्तं भवति। यथा शब्दादय आश्रिताः संसर्गिणो गुणाः एवमन्येऽपि जात्यादिधर्मो गुणः। इति।

स्त्रियाम् (४-१-३) इति सूत्रे भाष्ये गुणसमुदायो द्रव्यम्। का गति र्य एते भावाः कृदभिहितास्तद्धिताभिहिताश्च-चिकीर्षा, गोतेति। अथ मतमेतत् -कृदभिहितो भावो द्रव्यवद्भवती'ति। स्त्रीत्वमपि स्त्रीत्वेनाभिहितं द्रव्यवद्भविष्यति' इत्युक्तम्। एकं गुणसमुदायो द्रव्यमिति, अपरमिदं तदिति सर्वनामप्रत्यवमर्शयोग्यं द्रव्यमिति।

सरूपाणामेकशेष एकविभक्तौ (१-२-६४) इति सूत्रे भाष्ये 'द्रव्याभिधानं व्याडिः। द्रव्याभिधानं व्याडिराचार्यो न्याय्यं मन्यते - द्रव्यमभिधीयत इति।

व्याडिमहर्षेरयमाशयो भवितुमर्हति यत् - जातेः वृत्तिविकल्पाक्षमत्वेना-भावं मन्यमानो व्याडिः द्रव्यमेव शब्देनाभिधीयत इति मन्यते। आकृतिवादिपक्षेऽयं दोषोऽपि विद्यते। तेषां मते शब्देनाकृतिः बोध्यते, द्रव्ये तु कार्यं प्रवर्तते। अयुक्तं चैतत् यथा- 'गामालभेत' इत्यादिवाक्येषु

आकृतेरालम्बनादिकं न संभवति, द्रव्यस्य तु युज्यते । नह्यन्यस्य चोदनेऽन्यस्य कार्ये क्रियमाणे यथोक्तं कृतं भवति । तस्माद् द्रव्यमेव शब्देनोच्यत इति न्याय्यम् ।

ननु व्यक्तिशक्तावानन्त्यव्यभिचारयोः सत्त्वाज्जातौ शक्तिरवश्यम्भाविनीत्याशङ्क्यायाम् - ते एवमूचुः। व्यक्तिपक्षे जातेः सुतरां भानं न भवत्येव । जाति र्न तावद्द्रव्येषु व्यासज्यवृत्तिः, एकाश्रयनाशेऽप्रतीत्यापत्तेः । किञ्च गामालभेत इत्यादिवाक्येषु सर्वद्रव्यालम्भापत्तिः । प्रत्येकसमाप्तौ तु द्रव्यान्तरे तदनापत्तिः, तत्रापि सत्त्वे एकाकृतिरिति प्रतिज्ञाहानिः । अतः तत्तत्संस्थानाद्युपलक्षितमधिष्ठानचैतन्यमेव द्रव्यमिति नानन्त्यव्यभिचाराविति तात्पर्यम् । तत्तच्छब्दप्रतिपाद्ये एकस्मिन् विरुद्धधर्मोपपत्तेरभावाद्द्रव्यमेव पदार्थः ।

अस्मिन् पक्षे घटादिपदानां व्यक्तिमात्रमेव वाच्यम्, जाति र्वाच्यैव न । अवाच्यस्यापि घटत्वादेः शक्यतावच्छेदकत्वं सम्भवति । शक्यतावच्छेदकलक्षणे 'वाच्यत्वे सती'ति विशेषणं न देयमेव । द्रव्यत्वादेः घटपदशक्यतावच्छेदकत्वन्तु न, द्रव्यत्वस्याधिकदेशवृत्तितया घटपदशक्यतावच्छेदकत्वायोगात् । अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकत्वात् । अतो न दोषः।

१९. वाक्यपदीयकाराणामाशयः

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ।। (वा भू का ३)

अस्या अयमर्थः - यत्र = यस्मिन् अर्थे, वस्तूपलक्षणं = वस्तूपलक्ष्यते अभिधीयते येन तदुपलक्षणम् । वस्तुनः = वस्तुसामान्यस्य उपलक्षणम् = अभिधायकं भवति ।

वस्तूपलक्षणम् - वस्तुमात्राभिधायि सर्वनाम प्रयुज्यते, सोऽर्थो द्रव्यमित्युच्यते । तथा च इदं तदिति सर्वनामपरामर्शयोग्यं द्रव्यमिति । केचन वस्तुसामान्याभिधायिनः यथा - सर्व, विश्वेत्यादयः । अन्ये तु वस्तुविशेषवाचकाः, यथा - अन्यतर, अन्यतमादयः ।

भेद्यत्वेन विवक्षितमपि द्रव्यं भवति । भिद्यते इतरेण व्यावर्त्यते इति व्युत्पत्त्या भेदशब्दो विशेष्यपरः । इदञ्च लक्षणं न वस्तुभूतस्य बहिःस्थितद्रव्यरूपस्यार्थस्य, किन्तु शब्दार्थस्य बौद्धस्य असद्रूपस्य विकल्पगोचरस्य द्रव्यस्येति विवक्षितग्रहणेनात्राभिप्रेतम् । तथा च जात्यादिरपि यदि विशेष्यत्वेन विवक्षित स्तदा सोऽपि द्रव्यं भवति । व्यक्तिश्शब्दार्थ इति व्याडिदर्शनेनानेन सर्वपदार्थभवात् द्रव्यपदार्थव्यवस्था सिध्यति। एतदेव निरुक्तकारेणापि उक्तम् - 'अदेति यत् प्रतीयते तद् द्रव्यमिति'। एवञ्च वाक्यपदीयकारसिद्धान्तानुसारेण द्वे द्रव्यलक्षणे लभ्येते । एते द्वे लक्षणे व्याकरणशास्त्रीयप्रक्रियानिर्वहणार्थं प्रतिपादिते । प्रथमलक्षणस्वीकारात् 'किमेत्तिङव्ययघादाम्वाऽद्रव्यप्रकर्षे (५-४-१) इत्यत्र उच्चैस्तमः तरुः इत्यत्र उन्नतप्रदेश इत्यर्थे उच्चैश्शब्दस्याधिकरणशक्तिप्रधानत्वेन सम्बन्धस्य विशेष्यत्वात् देशस्य तत्र विशेषणत्वेन भेद्यत्वेन विवक्षितं द्रव्यम् इति लक्षितं द्रव्यत्वं नास्ति । अत एव सर्वनामपरामर्शयोग्यं द्रव्यं भवतीति लक्षणं स्वीक्रीयते । सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वाद्, अत्र द्रव्यप्रकर्षाभावान्निरुक्तार्थे आमुः प्रवर्तते । उन्नत स्तरुः इत्यर्थे तु तस्य विशेष्यत्वेन द्रव्यत्वात् प्रकृतनिषेधात् आमुः न प्रवर्तते । सर्वतन्त्रप्रसिद्धकणादपरिभाषितद्रव्यस्य (गुणाश्रयत्वं क्रियाश्रयत्वं वा) ग्रहणे उन्नतभूप्रदेशस्य, तादृशवृक्षस्य चोभयोरपि द्रव्यत्वेनोभयत्रापि द्रव्यप्रकर्षस्य सत्त्वात् तयोरुभयोरपि प्रत्युदाहरणत्वमेव स्यात् । तथा च भेद्यत्वेन विवक्षित इति लक्षणेन जातिरपि कदाचिद् द्रव्यं भवितुमर्हति ।

२० विशिष्टस्य वाच्यत्वप्रतिपादनम्

वाक्यपदीयकार एवमाह -

यथा संयोगिभिर्द्रव्यै र्लक्षितेऽर्थे प्रयुज्यते ।

गोशब्दो न त्वसौ तेषां विशेषाणां प्रकाशकः ।। (वा द्वि १५३)

आकारवर्णावयवैः संसृष्टेषु गवादिषु ।

शब्दः प्रवर्तमानोऽपि न तानङ्गीकरोत्यसौ ।। (वा द्वि १५४)

यथा गोशब्दः स्वार्थसंयोगिभिः द्रव्यैर्मणिघण्टिकापादुकादिभिर्गले बद्धैर्लक्षिते = उपलक्षणत्वेन विज्ञापितेऽर्थे गवि गोत्वे वा प्रयुज्यते । तु = किन्तु, असौ = गोशब्दस्तेषां मण्यादीनां विशेषाणां न प्रकाशकः, किन्तु गोव्यक्तेस्तद्गतजातेरेव वा प्रकाशकः । आकारेण = संस्थानेन, वर्णेन शुक्लत्वादिना, अवयवैः = सास्नालाङ्गूलककुदखुरविषाणैः, संसृष्टेषु = सम्बद्धेषु गवादिष्वर्थेषु प्रवर्तमानोऽपि गोशब्दः, तान् = आकारवर्णावयवान्, अन्तरङ्गानपि वाच्यत्वेन नाङ्गीकरोति, किमुत बाह्यान् मण्यादीन् विशेषान्। आकारवर्णावयवाव्यभिचारित्वाच्छब्दवाच्या न भवन्ति ।

इह शब्दस्य सामान्यमर्थो वाजप्यायनमतेन, व्याडिमतेन व्यक्तिरर्थः। तदुक्तं वार्तिककृता - आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः । द्रव्याभिधानं व्याडिः । (वा सं ३५, ४५) (सरूपाणामेकशेष एकविभक्तौ १-२-६४) प्रातिपदिकार्थमात्रे विभक्तौ सत्यां प्रातिपदिकेनाकृत्यभिधानाद् एकं वा = एकमेव आकृतिरूपं प्रातिपदिकार्थ इति वाजप्यायन आचार्यो मन्यते, व्याडिस्तु व्यवहारे सर्वत्रापि प्रातिपदिकेन द्रव्याभिधानमिति द्रव्यं प्रातिपदिकार्थ इति । तत्रेह सामान्यमात्रं = जातिमात्रं व्यक्तिमात्रं वा शब्दस्य प्रयोजकं = प्रवृत्तिनिमित्तम् अर्थत्वेनावबुध्यते व्यवहारे ।

२१. भाष्यकाराणामाशयः

वस्तुतस्तु 'नहि आकृतिपदार्थकस्य द्रव्यं न पदार्थः, द्रव्यपदार्थकस्य वा आकृति र्न पदार्थः । उभयोरुभयं पदार्थः' इति सरूपाणामेकशेष एकविभक्तौ (१-२-६४) इति सूत्रे भाष्ये जातिविशिष्टं द्रव्यं पदार्थः इत्युक्तम् । भाष्यस्यायमर्थः - आकृतिः = जातिः, पदार्थः = अभिधेयं यस्य, तस्य = आकृतिपदार्थकस्य, घटादिपदस्य, द्रव्यं = व्यक्तिः न पदार्थ इति न, किन्तु पदार्थ एव = अभिधेय एव । एवं द्रव्यपदार्थकस्य आकृति र्न पदार्थ इति न । उभयोः = आकृतिपदार्थक - द्रव्यपदार्थकयोः, उभयम् = आकृतिः, द्रव्यम् । पदार्थः = अभिधेय एव ।

आकृतिः पदार्थ इति वाजप्यायनः अभणत् । द्रव्यं पदार्थ इति व्याडिः अगदत्। उभयमपि भगवत्पतञ्जलेः सम्मतम् । पाणिनिसूत्राण्यपि तथैव वरीवृत्यन्ते । आकृतेः पदार्थत्वविषये सूत्रकारसम्मतिः विद्यते, यथा 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् (१-२-५९) इति । यदि व्यक्तिरेव पदार्थ इति चिन्तनं सूत्रकारस्य स्यात्तदा सम्पन्ना व्रीहयः इत्यत्र व्यक्तीनां बहुत्वात् बहुवचनं सिद्धमेवेति जात्याख्यायामिति सूत्रमेव नारभेत। तदारम्भा ज्जाते र्वाच्यत्वं भगवत्पाणिनिसम्मतम् । एवमेव व्यक्तेः पदार्थत्वं सूत्रकाराभिमतं न स्यात् तर्हि 'सरूपाणामेकशेष एकविभक्तौ (१-२-६४) इति सूत्रं न ब्रूयात् । यतः आकृतेरेकत्वादेवैकशब्दप्रयोगः । तेनैव च जात्यवच्छिन्नसकलव्यक्त्युपस्थितिः सम्भवतीति नानेकव्यक्त्यभिधानायानेक-शब्दप्रयोगप्रसङ्गः । सरूपसूत्रारम्भसामर्थ्याद् व्यक्तेरपि पदार्थत्वं पाणिनि-सम्मतमिति निश्चप्रचम् ।

एवं पक्षद्वयमपि भगवद्भाष्यकारसम्मतम्। अत एव 'अणुदित्सवर्णस्य चाप्रत्ययः(१-१-६९) इति सूत्रं जातिपक्षे नावश्यकम्, व्यक्तिपक्षे आवश्यकमित्युक्तम्। तथैव 'अइउण्' सूत्रे भाष्ये 'रूपसामान्यात्सिद्धम्' इत्यनेन व्यक्तिपक्षः, 'आकृतिग्रहणात्सिद्धम्' इत्यनेन जातिपक्षश्च प्रतिपादितः।

अयमत्र निष्कर्षः - न केवला जाति र्व्यक्ति र्वा पदार्थः, किन्तु जातिविशिष्टव्यक्तिरेव पदार्थः। सङ्केतस्य बोधकत्वस्य वा विशिष्ट एव सत्त्वात्। न च घटत्वप्रकारकघटविशेष्यकबोधे घटशक्तिज्ञानत्वेन कारणत्वमस्तु इति वाच्यम्। द्रव्यादिपदार्थानामपि एवमेवापत्तौ घटपदाद्द्रव्यबोधप्रसङ्गात्। अतो विशिष्टमेव शक्यम्। केवलजातिशक्तिवादिनो मीमांसकाः। केवलव्यक्तिशक्तिवादिनः प्राचीननैयायिकाः। विशिष्टशक्तिवादिनो वैयाकरणाः नैयायिकनव्याश्च।

२२ लिङ्गविचारः

लङ्ग्यते ज्ञायतेऽनेनेति लिङ्गम्। लौकिकानां व्यवहारे लिङ्गमेवं विद्यते। यथा -

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।
उभयोरन्तरं यच्च तदभावे नपुंसकम्।। इति ।

स्तनकेशवती स्त्री स्यादित्यत्र स्तनकेशग्रहणमन्येषामपि प्रसवयोग्य-प्रजननादीनामुपलक्षणम्। एवं लोमग्रहणमपि मेढ्रादीनां पुंधर्माणामुपलक्षणम्। स्त्रीपुंसयोरुभयोरपि तुल्यजातीयं, तन्नपुंसकं भवति। इदं चेतनैकनियतं लिङ्गलक्षणम् ।

वैशेषिका एवं मन्वते - स्तनकेशाद्यभिव्यङ्ग्या जातिः स्त्रीत्वपुंस्त्वादिका लिङ्गमिति । अत्रायमर्थः प्रतीयते यत् प्रसवसंस्त्यानयोग्यस्तनकेशकलापप्रजननादिभिरुपव्यञ्जनैः यस्य सम्बन्धः संयोगसमवायान्यतरलक्षणो तन्निष्ठं लिङ्गम् । तत्र स्तनप्रजननादिभिरवयविनः समवायलक्षणः सम्बन्धः, स्तनादीनामवयवत्वात् । केशकलापेन सह तु द्रव्यस्य पिण्डरूपस्य संयोगलक्षणः सम्बन्धः, केशकलापस्य पिण्डानवयवत्वात्। तत्र प्रसवः पुंस्त्वम्, तदुपव्यञ्जनानि प्रजननादीनि , संस्त्यानं स्त्रीत्वम्, तद्योग्योपव्यञ्जनानि स्तनकेशादीनि ।

भाष्यकारैस्तु 'सत्त्वरजस्तमसां गुणानामवस्था उपचया -पचय-साम्यरूपाः इत्युक्तम् । तत्र गुणानामुपचयः पुंस्त्वम्, तेषामेवापचयः स्त्रीत्वम्, तेषां साम्यं तु नपुंसकत्वमिति । तत्तदवस्थाविशिष्टागुणा एव लिङ्गमिति वदतां सांख्यानामप्ययमेवाशयः । इदं लक्षणं चेतनाचेतनसाधारणं भवति। लौकिकलिङ्गस्वीकारे एते दोषा अपि प्रदर्शिताः । यथा -

लिङ्गात् स्त्रीपुंसयो र्ज्ञाने भ्रुकुंसे टाप् प्रसज्यते ।
नत्वं खरकुटीः पश्य खट्टावृक्षौ न सिध्यतः ।।

(महाभाष्यम्, स्त्रियाम्, ४-१-३)

लिङ्गात् स्त्रीत्व-पुंस्त्वादिलक्षणात्, स्त्रीपुंसयो र्ज्ञानेऽभ्युपगम्यमाने भ्रुकुंसे (स्त्रीवेषधारिणि नटे) टाप् प्रसज्यते । खरकुटीः पश्य इत्यत्र नत्वं प्राप्नोति 'तस्माच्छसो नः पुंसि (६-१-१०३) इत्यनेन । खरकुटीः नापितगृहमुच्यते । सा इव केशलोमावृतो ब्राह्मणः खरकुटीः इत्युच्यते । इवे प्रतिकृतौ (५-३-९३) इति विहितस्य कनः लुम्मनुष्ये (५-३-९८) इति लुप् । तान् खरकुटीर्ब्राह्मणान् पश्य इत्यत्र नत्वं प्रसज्यते । ब्राह्मणेषु पुंस्त्वलिङ्गस्य दर्शनात् । खट्वावृक्षयोः स्त्रीत्वपुंस्त्वलिङ्गयोरदर्शनात् खट्वेत्यत्र टाप् न सिध्यति । पुंधर्माणामभावेन वृक्षः इति पुंसि प्रयोक्तुमेव न शक्यते। अतो वैशेषिकाः- सर्वत्राभिन्नाभिधानप्रत्ययोन्नीतसद्भावां जातिं मन्यन्त इति स्तनाद्युपव्यञ्जनाभियुक्तविशेषाः स्त्रीपुंनपुंसकत्वरूपलिङ्गजातिरित्याहुः। सा चाचेतनेष्वपि सत्त्वरजस्तमसां गुणानामुपचयापचयसाम्यावस्था-रूपोपव्यञ्जनाभिव्यक्ता विद्यते। अस्ति खट्वादीनामपि किञ्चिल्लिङ्गनिमित्तं गुणानामपचयादिरूपं, यद्वशात् स्त्र्याद्याकारप्रत्ययप्रादुर्भावः। सत्यमेतत्, अर्थ-व्यक्ति-वस्तु- शब्दानां सर्वभावेषु अव्याहतप्रयोगात्, त्रिलिङ्गयोगो लिङ्गत्रयाकारप्रत्ययान्यथानुपपत्तावनुमीयते । तत्र च परस्परविरोधि स्तनकेशमेढ्रादिभिः नियतव्यञ्जनसम्बन्धरूपं लौकिकमत्र कथं स्यादिति चे, ल्लौकिकलिङ्गत्रयानादरेण जातिपक्षाश्रयणात्। स्त्रीत्वादिजातीनां हि सर्वगतत्वाद् एकाश्रयसमवायित्वं बह्वीनामुपपद्यते।

सांख्याः सत्त्वरजस्तमसां गुणानां सततपरिणामिनामुपचयापचय-मध्यस्थलक्षणावस्थाविशेषाः यथायोगं पुंस्त्वादिलिङ्गमधितिष्ठन्ति। एतच्च लक्षणं भाष्यकाराभिमतम्। महाभाष्यकार आह -

संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः।
संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप्रसवे पुमान्।।

सर्वाश्च पुनर्मूर्तय एवमात्मिकाः संस्त्यानप्रसवगुणाः

अस्या अर्थः- संस्त्यानम् = संहननम्, सङ्कोचः = अपचयः स्त्रीत्वम्। प्रसवः = वृद्धिः, उपचयः पुंस्त्वमिति। स्वकृतान्तः = वैयाकरणसिद्धान्तः। संस्त्यानप्रसवौ = अपचयोपचयरूपौ, लिङ्गं स्त्रीत्वं पुस्त्वं चास्थेयौ = स्वीकार्यौ संस्त्याने अर्थे स्त्यायतेः ड्रट् स्त्रीति, सूतेः षू धातोः सप्, सकारस्य पकारः, डुम्सुन् प्रत्यये च पुंस् शब्दः प्रसवगुणानामुपचयेऽर्थे निष्पन्नः। सर्वाश्च मूर्तयः = मूर्ताः पदार्थाः एवमात्मिका इत्यस्य व्याख्यानं संस्त्यानप्रसवगुणमिति। सर्वा इति कथनेन वृक्षादावपि लिङ्गयोग उपपद्यते। तत्रापि गुणावस्थारूपलिङ्गयोगसम्भवात्। एवं सर्वत्रापि त्रिलिङ्गता समर्थिता। केषाञ्चिद् दारादिशब्दानां नियतलिङ्गाभिधाने तु कारणं शब्दशक्तिस्वभाव एव।

सङ्ग्रहकारः लिङ्गविषये एवमुवाच - संस्त्याने, संहननं तमोनिवृत्तिशक्तिरुपरतिः प्रवृत्तिः = प्रतिबन्धस्तिरोभावः स्त्रीत्वम्। प्रसवो विष्वग्भावो वृद्धिशक्तिः वृत्तिलाभोऽभ्युद्रेकः प्रवृत्तिराविर्भाव इति पुंस्त्वम्। अविवक्षातः साम्यं स्थितिः औत्सुक्यनिवृत्तिरपरार्थत्वमङ्गभावनिवृत्तिः कैवल्यमिति नपुंसकत्वम्।

सांख्येषु केचन एवं मन्यन्ते - स्त्रीत्वादिलिङ्गावभासकमपि प्रत्ययमुपजनयन्तो भवन्ति लिङ्गव्यपदेश्याः। एकस्यापि वस्तुनो घटादेः शब्दभेदेनार्थः, व्यक्तिः, वस्तु इति लिङ्गभेदस्य दर्शनात् बहिरसत्त्वेन शशविषाणादिवत् विकल्पगोचरो लिङ्गयोगः शब्दैरुत्पादित इव बाह्यवस्तुनि अध्यस्त इति शब्दाभिधेयः स्वभावो लिङ्गमिति। शब्दसंस्कारत्वेन लिङ्गस्य व्यवहारो दृश्यते। यथा - स्त्रीत्वपुंस्त्वरूपलिङ्गकार्यं टाब्नत्वादिकं दृष्ट्वा, तत्कृतेन तत्कार्येण टाबादिना ते स्त्रीत्व-पुंस्त्वरूपे लिङ्गे उपलक्ष्येते, यथा आकाशेन ज्योतिषः उपलक्ष्यं भवति, इहाकाशे रोहिणीति। भाष्ये

एवमुक्तम् - तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिषः। अस्माद् भाष्याद् अर्थधर्मस्य जात्यादिरूपस्य गुणावस्थारूपस्य वा लिङ्गस्य शब्दान्वाख्याने शब्दसंस्काररूपे निमित्तत्वं लिङ्गकार्यस्य च टाबादेः लिङ्गोपलक्षकत्वं प्रतीयते। प्रकाशव्याख्यायां हेलाराजेन एवं निर्णयः कृतः 'न शक्यं वैयाकरणैः लौकिकं लिङ्गमाश्रयितुम्। अवश्यं स्वकृतान्तः आस्थेयः इति विचार्य पूर्वोक्तसंस्त्यानप्रसवौ लिङ्गमिति लक्षणम् इति। तत्र भाष्यकाराणामाशयं वाक्यपदीयकारः एवमवर्णयत्।

आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः।
धर्माः मूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः।। (वा लिङ्ग १४)

वर्धते, यावदनेन वर्धितव्यम्, अपायेन वा युज्यत इति भावानां सततपरिणामित्वाद्धर्ममात्रस्यानपायित्वम्। सर्वेषु पदार्थेषु सर्वेषां भावानां तप्तभ्राष्ट्रनिक्षिप्तधान्यवद् गुणमयत्वाद् गुणशीलत्वेन सततं परिणामित्वादुपचयापचयसाम्यावस्थाधर्मत्रयं चेतनेष्वचेतनेष्वपि भवन्ति। आह च पुनरेवम् -

सर्वमूर्त्यात्मभूतानां शब्दादीनां गुणे गुणे।
त्रयः सत्त्वादिधर्मा स्ते सर्वत्र समवस्थिताः।। (वा लिङ्ग १४)

२३. लिङ्गं प्रातिपदिकार्थः

लिङ्गस्य प्रातिपदिकार्थत्वे बहूनि सूत्राणि प्रमाणानि भवन्ति। यथा - स्वमो र्नपुंसकात् (७-१-२३), ह्रस्वो नपुंसके प्रातिपदिकस्य (१-२-४७), नपुंसकस्य झलचः (७-१-७२) इत्यादीनि। तस्माच्छसो नः पुंसि (६-१-१०३) इत्यत्र पुसीत्यस्य पुंल्लिङ्गशब्दस्य प्रकृतित्वे इत्यर्थः। स्त्रियाम् (४-१-२) इत्यस्य स्त्रियां वर्तमानात् प्रातिपदिकादित्यर्थः वर्णनीयः। प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (२-३-४६) इति सूत्रे लिङ्गमित्यस्यापि तत्र वर्तमानादित्यर्थः। लिङ्गस्य प्रथमार्थत्वे तु घटेन

इत्यादौ तत्प्रतीत्यनापत्तिः । अत स्तस्य नामार्थत्वमेवाऽऽस्थेयम्। तच्च लिङ्गं पारिभाषिकमेव शास्त्रे सर्वत्र व्यवस्थापकं भवति। पुंल्लिङ्गोऽयं शब्द इत्यादिव्यवहाराल्लिङ्गं शब्दनिष्ठमेव । अत्र च प्रमाणं ह्रस्वो नपुंसके प्रातिपदिकस्य (१-२-४७) इत्यादि शास्त्राणि। ह्रस्वत्वदीर्घत्वप्लुतत्वो-दात्तत्वानुदात्तत्ववत् स्त्रीत्वपुंस्त्वादिविरुद्धधर्ममादाय शब्दाः भिद्यन्ते। लिङ्गस्यार्थनिष्ठत्वे तु तदनुपपत्तिरेव। एवमात्मा ब्रह्मेत्याद्यनुपपत्तिरेव । लिङ्गस्य शब्दनिष्ठत्वे प्रपञ्चस्य मायिकत्वेन तद्दशायां ब्रह्मणोऽपि तद्भिन्नशब्दबोध्यत्वेन तत्रापि लिङ्गभेदव्यवस्था उपपद्यते। अनेकलिङ्गकः कश्चित् शब्दो नास्त्येव । तटं त्रिषु इति कोशव्यवहारस्तु शब्दानामभेदोपचाराद् उपपाद्यः। एकस्य त्रिलिङ्गकत्वम्, एकस्य द्विलिङ्गकत्वम्, एकस्य शब्दस्यैकलिङ्गकत्वमित्यत्र कोशादिकं प्रमाणं भवति।

२४ संख्याविचारः

संख्यायते अनया इति संख्या । उक्तञ्च वाक्यपदीये -

संख्यावान् सत्त्वभूतोऽर्थः सर्व एवाभिधीयते ।
भेदाभेदविभागो हि लोके संख्यानिबन्धनः ।। (वा सं १)

सर्व एव सत्त्वभूतोऽर्थः = द्रव्यरूपोऽर्थः, संख्यावान् अभिधीयते सुबन्तपदैः तिङन्तपदै र्वा । लिङ्गसंख्यान्वितं द्रव्यमिति द्रव्यपदार्थनिरुक्तेः। हि = यतः, द्रव्यस्य भेदाभेदविभागः संख्यानिबन्धनः = संख्याप्रयुक्तः, तत्र द्रव्यस्य भेदव्यवहारो द्वित्वादिसंख्याकृतः, अभेदव्यवहारश्च तस्यैकत्वसंख्याकृत इत्यर्थः ।

स धर्मो व्यतिरिक्तो वा तेषामात्मैव वा तथा ।
भेदहेतुत्वमाश्रित्य संख्येति व्यपदिश्यते ।। (वा सं २)

स धर्मः = संख्यारूपो धर्मः, व्यतिरिक्तो वा = आश्रयात् भिन्नो वा, तथा = तेन प्रकारेण = पूर्वकारिकोक्तप्रकारेण, तेषां = संख्येयानाम्, आत्मैव = स्वरूपमेव वाऽस्तु । तथापि स्वश्रयभेदहेतुत्वमाश्रित्य स धर्मः

संख्येति व्यपदिश्यते = व्यवह्रियते । संचष्टे = सम्यग् ब्रूते = सम्यग् बोधयति, स्वाश्रयं भिन्नतया अभिन्नतया वा यो धर्मः सा संख्या इत्यन्वर्थव्युत्पत्तिः।

२५. वैशेषिकाणामाशयः

वैशेषिकाणां मते संख्या गुणात्मिका द्रव्याश्रिता च । न च पदार्थ एवासहाय एकत्वं, ससहायश्च यथायोगं द्वित्वादिका संख्या, न तु द्रव्यरूपपदार्थधर्मः संख्या इत्येवं सहायाभाव-तद्योगयोर्धर्मान्तरत्वाभावान्न कश्चिद्द्रव्यादन्यः संख्यारूपो गुण इति द्रव्यव्यतिरिक्तायाः गुणरूपायाः संख्याया अभाव इति वाच्यम्, अनुभवभेदात्।

अनेकेषु द्रव्येषु व्यासज्यवृत्तिः संख्या च द्वित्वादिका अनेकस्मिन् द्रव्ये समवेता अपेक्षाबुद्धिप्रभाविता (अयमेकोऽयमेक इत्यादिकयाऽपेक्षाबुद्ध्या जनिता व्यासज्यवृत्तिरवधार्यत एव संयोगविभागवत्) न ह्यनेकद्रव्यं नास्ति, तत्र वा इयं प्रतीति र्नास्ति । शतमित्यादिका संख्या च केवलमनेकाश्रयत्वेऽपि संख्यासामान्याद् भिद्यते। संख्यासामान्यस्य प्रत्याश्रयपरिसमाप्तत्वात्, शतादिसंख्याविशेषस्य त्वतथात्वाद् अर्थान्तरापेक्षत्वाच्च, संख्यासामान्यस्य त्वर्थान्तरानपेक्षत्वाद् इति ।

ननु द्रव्ये विद्यमाना संख्या कथं गुणादीनां व्यावर्तिका भवति चतुर्विंशतिर्गुणाः, पञ्चकर्माणि, चत्वारोऽभावा इति संख्यानिमित्तव्यवहारः कथमिति शङ्कायाम्, वाक्यपदीयकार एवमाह -

समवेता परिच्छेद्ये क्वचिदन्यत्र सा स्थिता ।
प्रकॢप्यति भावानां संख्याभेदं तथात्मनः ।। (वा सं ३)

संख्यानिमित्तव्यवहार स्त्रिधा दृश्यते -

१. या संख्या द्रव्ये परिच्छेद्ये स्थिता तद् भेदहेतुः । यथा - एको द्वौ त्रयो वा घटाः इति ।
२. या संख्या क्वचित् परिच्छेद्येभ्यो गुणादिभ्योऽन्यत्र द्रव्येऽपि स्थिता । यथा - चतुर्विंशतिर्गुणाः ।

३. या संख्या द्रव्यस्य गुणादीनाञ्च भेदं प्रकल्पयति । यथा - शतं, शते, शतानि इति । शते एकत्वं द्वित्वं त्रित्वं वाऽविद्यमानमन्यत्र स्थितमपि सामानाधिकरण्येन परिच्छेदकतया प्रतीयते ।

२६. वैयाकरणानामाशयः

शब्दाभिहित एव पदार्थ इति पदार्थविचारानादरात् यथायथं प्रकृत्यर्थप्रत्ययार्थपरिकल्पनद्वारा पदार्थकल्पनां मन्वते । अतस्संख्यायाः प्रकृत्यर्थत्वमतेनायं विचारः प्रस्तुतः । अत्र च प्रमाणे - द्व्येकयो र्द्विवचनैकवचने (१-४-२२), बहुषु बहुवचनम् (१-४-२३) इति सूत्रे । ताभ्यां सूत्राभ्यां प्रातिपदिकार्थगतैकत्वद्वित्वबहुत्वविवक्षायां तत्तद्वचनानि विहितानि । अतः संख्या प्रातिपदिकार्थ इति स्पष्टं प्रतीयते। दधि पश्य, वारि आनय इत्यादिवाक्येषु प्रत्ययरहितेऽपि एकदधिकर्मकं दर्शनम्, एकवारिकर्मकमानय-नमिति बोधदर्शनात् प्रकृत्यैव संख्या बोध्यते इत्यभ्युपगन्तव्यम् । तच्च संख्यायाः प्रातिपदिकवाच्यत्वमन्तरा न सिध्यति ।

२७. कारकविचारः

करोतीति कारकम् । कृञ् धातोः कर्तरि ण्वुल्तृचौ (३-१-१३३) इत्यनेन ण्वुल्, युवोरनाकौ (७-१-१) इत्यकादेशः, कृ + अक अचोञ्णिति (७-२-११५) इति ऋकारस्य वृद्धिः, उरण् रपरः (१-१-५१) इत्यनेन रपरत्वम् । कृदन्तत्वेन प्रातिपदिकसंज्ञायां प्रथमैकवचने सुप्रत्ययः, नपुंसके अमादेशः पूर्वरूपं कारकम् इति भवति । भर्तृहरिः एवमाह -

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे ।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः ।। (वा सा १)

स्वाश्रये = साधनाश्रये, समवेतानां क्रियाणाम्, तद्वदेवाश्रयान्तरे समवेतानां क्रियाणामभिनिष्पत्तौ यत् सामार्थ्यं तद्भाष्यकारप्रभृतयः साधनं विदुः । तत्र कर्तृत्वशक्तिरूपं सामर्थ्यं स्वाश्रये समवेतानां व्यापाररूपाणां क्रियाणां सिद्धौ साधनम् । कर्मत्वशक्तिरूपं सामर्थ्यन्तु स्वाश्रये समवेतानां क्रियत इति कर्मव्युत्पत्त्या फलरूपाणां क्रियाणां साधनम् । करणत्वादि

शक्तिरूपन्तु सामर्थ्यमाश्रयान्तरे = स्वाश्रयातिरिक्ते, आश्रये समवेतानां क्रियाणां फलरूपाणां व्यापाररूपाणां वा सिद्धौ साधनमिति विवेकः । साधनस्यैव कारकमित्यनर्थान्तरम् । एतानि कारकाणि षट् । तानि -

कर्ता कर्म च करणं संप्रदानं तथैव च ।
अपादानाधिकरणे इत्याहुः कारकाणि षट् ।।

तत्र करणत्वं फलरूपाणां क्रियाणां साधनम् । उक्तञ्च वाक्यपदीये-

क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ।। (वा सा ९०)

अत्र क्रियापदेन फलं ग्राह्यम् । संप्रदानत्वन्तु दातृगतानां व्यापाररूपाणां क्रियाणां साधनम् । अश्वात् पतति इत्यादावपादानत्वमपि परसमवेतानां व्यापाररूपाणामेव क्रियाणां साधनम् । अधिकरणत्वन्तु परसमवेतानां फलरूपाणां क्रियाणां साधनम् । उक्तञ्च -

कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् ।
उपकुर्व त्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ।। (वा सा १४८)

अत्रोत्तरार्धे क्रियापदेन फलं विवक्षितम् । क्रियायाः व्यापाररूपायाः फलरूपायाः वा निर्वृत्तौ = सिद्धौ, द्रव्यस्य कर्तृत्व - कर्मत्वप्रभृतिका शक्तिः साधनमिति । साध्यतेऽनया क्रिया इति व्युत्पत्त्या भाष्यकारप्रभृतयो विदुः ।

किं नाम कारकत्वम्? इति विषये प्राचीना एवं जगदुः - कारकशब्दः क्रियापरः। अन्वयीत्यध्याहार्यः। एवञ्च क्रियान्वयित्वं कारकत्वमिति फलति। कर्त्रादिषण्णां क्रियान्वयित्वं दृश्यत एव। एतल्लक्षणस्वीकारादेव 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इत्यत्र ब्राह्मणस्य न कारकत्वम्। पुत्रस्यैव क्रियान्वयित्वात् तत्त्वम्। ब्राह्मणस्य पुत्रेऽन्वयान्न कारकत्वम्। यदि क्रियाजनकत्वं कारकत्वं तदा एतद्दोषवारणाय लक्षणेऽनन्यथासिद्ध इति विशेषणं देयम्। तथा चानन्यथासिद्धनियतपूर्ववृत्तित्वघटितक्रियाजनकत्वमिति लक्षणे ब्राह्मणस्यान्यथासिद्धत्वेन दोषो वार्यते। एतद्विशेषणाभावे 'सुन्दरं पुत्रं पृच्छति' इत्यत्र सुन्दरविशिष्टस्य पुत्रस्य क्रियाव्याप्यत्वेन सुन्दरादीनां

कर्मकारकत्ववत् ब्राह्मणसम्बन्धिपुत्रस्य विशिष्टस्य क्रियाव्याप्यत्वेन ब्राह्मणस्यापि तत्त्वं स्यात्। परं तद्विशेषणनिवेशनप्रयुक्तं गौरवं भवति। क्रियान्वयित्वे तु ब्राह्मणस्य क्रियायामन्वयाभावाद्वार्यते।

२८. क्रियाजनकत्वं कारकत्वम्

१. करोति = क्रियां निर्वर्तयति इति कारकशब्दः क्रियापरत्वेन भाष्ये व्यवहृतः। यावद् ब्रूयात् क्रियायामिति, तावद् कारके इति। क्रियाऽत्र कारकशब्देनोच्यते। जनकमित्यध्याह्रियते। एवञ्च क्रियाजनकत्वं कारकत्वम् इति लभ्यते।

२. कारकम् इत्यस्य संज्ञाशब्दत्वेऽपि महासंज्ञाबलादेतादृशार्थलाभः।

३. क्रियाजनकत्वमखण्डोपाधिरूपमिति क्रियान्वय्यपेक्षया लाघवम्।

४. कारकाणां भावनान्वयः इति नियमस्य क्रियान्वयिनां क्रियान्वयः इत्यर्थापत्त्याऽसंङ्गत्यापत्तेः। क्रियाजनकत्वे तु क्रियाजनकानां क्रियान्वय इति युज्यते नियमः ।

५. अधिकरणस्य कारकत्वेन क्रियान्वयः इति व्यवहारोऽसंगतः स्यात्, आत्माश्रयात् । क्रियाजनकत्वे तु अधिकरणस्य क्रियाजनकत्वेन क्रियान्वय इति सङ्गच्छते ।

६. क्रियान्वयित्वं कारकत्वमित्यंशो भाष्ये लेशतोऽपि न स्पृष्टः ।

७. बुद्धिसत्तासमाविष्टस्यैव घटशब्दवाच्यत्वेन घटं करोति , घटं स्मरति इत्यत्र बौद्धघटादेः पूर्वकालत्वेन स्मृत्यादि निष्पादकत्वं बोध्यम् ।

ननु क्रियाजनकत्वं कारकत्वमिति लक्षणस्वीकारे 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति ' इत्यत्र पुत्रद्वारा ब्राह्मणस्यापि क्रियाजनकत्वात् कारकत्वापत्तिरिति चेत् -

उच्यते, पुत्ररूपपृच्छिक्रियाकर्मयुक्तत्वाद् अकथितञ्च इत्यनेनात्र कर्मत्वं वक्तव्यम् । परं तेन सूत्रेणात्र कर्मसंज्ञा वक्तुं न शक्यते । भाष्येऽकथितञ्चेति सूत्रे कर्तुरीप्सिततमं कर्म, अकथितञ्चेत्यनयोः अन्यतरत्

कर्तुं शक्यत इति विचारसन्दर्भे कर्तुरीप्सिततममित्यनेन यत्र कर्मसंज्ञा, तत्राकथिञ्चेति सूत्रेण सिध्यति।

अकथितञ्चेत्यनेन यत्र संज्ञा , तत्र कर्तुरीप्सिततममित्यनेन न सिध्यति । तथा हि - दुहादिनां नियमेन व्यापार- द्वयार्थत्वाभावेन यदा गोनिष्ठविभागानुकूलव्यापार एव धात्वर्थस्तदाऽपादानत्वाविवक्षाया-मन्येनासिद्धकर्मसंज्ञाविधानार्थमस्यावश्यकत्वादेव कर्तुरीप्सिततमं कर्मेत्यनेनाऽस्य वैयर्थ्यं नाशङ्कितम् । अनेन अकथितञ्चेति सूत्रं सूत्रप्राप्ता-पादानाद्यविवक्षायां सर्वदा तदप्राप्तौ च प्रवर्त्तत इति लभ्यते ।

अकथितञ्चेति सूत्रविहितया द्वितीययाऽपि कर्मत्वमेव बोध्यते । अत एव अत्र सूत्रे भाष्येऽनेनैव सिद्धे आद्यसूत्रद्वयवैयर्थ्यशङ्काकरणं संगच्छते। अन्यथाऽनेन सम्बन्धत्वेन, ताभ्यां कर्मत्वेन बोधे भिन्नार्थकत्वेनाऽनुपपन्नं स्यात्।

२९. कारकस्य प्रातिपदिकार्थत्वप्रतिपादनम्

दधि पश्य , वारि आनय इत्यादिषु सुबभावेऽपि दधिकर्मकं दर्शनम्, वारिकर्मकमानयनमित्यर्थदर्शनात् कारकमपि प्रातिपदिकार्थ इत्यभ्युपगन्तव्यम् । दधि, वारि इत्यत्र सुप् कृतस्तस्य स्वमोर्नपुंसकात् इत्यनेन लुक्कृतः । यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेन विद्यमानप्रकृतिरेव तदर्थबोधिका भवति । तावता कथं कारकस्य प्रातिपदिकार्थत्वमिति संशीतिः जायेत, तस्येदमुत्तरम् । तत्र प्रत्ययमजानतोऽपि बोधदर्शनात्, प्रकृतिरेव तद्वाचिका भवतीत्यवश्यमङ्गीकर्तव्यमेव ।

एवं पञ्चकं प्रातिपदिकार्थ इति पक्षे प्रत्ययः द्योतको भवति । द्योतकत्वञ्च - स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वम् । उक्तञ्च वाक्यपदीयकारेण -

वाचिका द्योतिका वा स्युः द्वित्वादीनां विभक्तयः ।
स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः ।। (वा द्वि १६४)

ननु पञ्चकं प्रातिपदिकार्थ इति पक्षे नामार्थप्रकारकबोधं प्रति

तदुत्तरसुबादिजन्योपस्थितिः कारणमिति कार्यकारणभावस्य विलयापत्तिरिति वाच्यम् । इष्टापत्तेः , द्योत्यार्थमादाय वा तदुपपत्तेः ।

ननु द्योत्यार्थस्य विशेषणत्वात् घटमित्यत्र घटकर्मकमिति, घटेन इत्यत्र घटकर्तृक इति बोधयोरनुपपत्तिरिति चेत् - इष्टापत्तेरेव तत्र कर्मत्वशक्तिमान् घटः, कर्तृत्वशक्तिमान् घटः इत्येव वास्तविको बोधः।

३० पञ्चानां प्रातिपदिकार्थत्वप्रतिपादकभाष्याणि

कुत्सिते (५-३-७४) इति सूत्रे भाष्ये एवमाह -

स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम्।
समवेतस्य च वचने लिङ्गं वचनं विभक्तिं च ।। १ ।।

अभिधाय तान्विशेषानपेक्षमाणश्च कृत्स्नमात्मानम्।
प्रियकुत्सनादिषु ततः प्रवर्ततेऽसौ विभक्त्यन्तः।। २ ।।

यद्यपि लोके पदादुच्चरिताद्युगपत्पञ्चार्थाः प्रतीयन्ते शब्दस्य विरम्य व्यापाराभावात्तथाप्यन्वयव्यतिरेकाभ्यां शास्त्रे संव्यवहाराय कल्पिताभ्यां प्रातिपदिकस्याऽप्रयोगार्हस्य कल्पितामर्थवत्तां कल्पितन्यायवशात्क्रमवतीमाश्रित्येदमुच्यते। इति कैयटेन व्याख्यातञ्च।

कुत्सित इत्यर्थे प्रथमान्तात् कः स्यादिति सूत्रार्थः। कुत्सितः = अश्वः अश्वक इत्यादि उदाहरणम्। एवम् 'अनुकम्पायाम्' को विहितः, अनुकम्पितो देवदत्तः - देवदत्तकः। अत्र भाष्ये एवं शङ्का कृता - कुत्सितकः, अनुकम्पितकः इत्यत्र प्रकृत्यैव कुत्सानुकम्पयोरुक्तत्वात् तत्र को न प्राप्नोति इष्यते च तत्र स इति। कुत्सितशब्दादनुकम्पाया, मनुकम्पितशब्दात् कुत्सायां प्रत्ययप्रवृत्ते र्न दोष इति समाधाय अथवेत्यादिना निरुक्तवार्तिकद्वयेन द्वितीयं समाधानमुक्तम्। अयमत्र भाष्यार्थः - शब्दः = प्रातिपदिकरूपः शब्दः, स्वार्थम् - स्वः = स्वीयः, अर्थः = अभिधेयः स्वार्थः, तम् = जातिगुणक्रियाशब्दरूपं प्रवृत्तिनिमित्तम्, अभिधाय =

तद्विषयकाभिधाग्रहविषयो भूत्वा, निरपेक्षः = तच्छक्तिग्रहेतरनिरपेक्षः, समवेतम्= समवायेन सम्बद्धम्, द्रव्यम् = इदं तदिति सर्वनामपरामर्शयोग्यं वस्तुरूपद्रव्यम्, आह = ब्रवीति। समवेतस्य = समवायिनः, वचने च = अभिधाने सति, लिङ्गम् = संस्त्यानादि, संख्याम् = एकत्वादिकां संख्याम्, विभक्तिं = कर्मकरणादि कारकं च, आह = ब्रूते। एवमनया कारिकया स्वार्थद्रव्यलिङ्गसंख्याकारकरूपं पञ्चकं विभक्तिरहितेन प्रातिपदिकेन बोध्यते इत्यर्थो लभ्यते। एतादृशः प्रातिपदिकरूपः शब्दस्तु बहिर्भूतापत्यकुत्सानुकम्पाद्यर्थान्तरेण नोपसंक्रामति, किन्तु एतादृशप्रातिपदिकप्रकृतिकविभक्त्यन्त एव। एवञ्च प्रातिपदिकमेव जात्याद्यर्थपञ्चकमभिधत्ते, परं तु तस्मान्न तद्धितोत्पत्तिः, किन्तु द्योतकविभक्तेरुत्पत्त्यनन्तरमेवेति सामाधानभाष्यार्थेन स्पष्टतया पञ्चकं प्रातिपदिकार्थ इति सिद्धान्तो लभ्यते। स्वार्थे परिपूर्णं पदमर्थान्तरेणोपसंक्रामतीति न्यायेन 'सुबन्तात्तद्धितोत्पत्तिः' इति सिद्धान्तः सिध्यति।


३१. 'बहुषु बहुवचनम्' इति सूत्रभाष्यम्

सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा।।

सुपां कर्मादयोऽप्यर्था इत्येकं वाक्यं सुब्विषयकम्। 'संख्या चैव तथा तिङाम्' इति तिङ्विषयकं द्वितीयं वाक्यम्। प्रथमवाक्यस्थ कर्मादय इत्यत्रादिपदेनापादानसम्प्रदानकर्तृकरणानां ग्रहणम्। अपि शब्देनैकत्वादिसंख्यायाःग्रहणम्। 'कर्मणि द्वितीया (२-३-२), कर्तृकरणयोस्तृतीया (२-३-१८),अपादाने पञ्चमी (२-३-२८), चतुर्थी सम्प्रदाने (२-३-१३), सप्तम्यधिकरणे च (२-३-३६), द्व्येकयो र्द्विवचनैकवचने (१-४-२२), बहुषु बहुवचनम् (१-४-२१) इति शास्त्रबलात् कर्मादिकारकषट्कमेकत्वादिसंख्या च सुपामर्थ इति प्रथमवाक्यस्यार्थः। कर्मत्वादिशक्तिरपि शक्तिमताऽभेदमापन्नेव विभक्त्योच्यते। अतः शक्तिः कारकमिति पक्षेण न विरोधः।

द्वितीयं वाक्यं तिङ्विषयकम्। अस्मिन् वाक्ये चकारात् कर्तृकर्मणी गृह्येते। लः कर्माणि च भावे चाकर्मकेभ्यः (३-४-६९) द्व्येकयो र्द्विवचनैकवचने (१-४-२२), बहुषु बहुवचनम् (१-४-२१) इति शास्त्रबलात् कर्तृकर्मणी एकत्वादिसंख्या च तिङामर्थ इति लभ्यते।

नियमो द्विविधः - १ प्रत्ययनियमः २ अर्थनियमः । आद्यः एकत्वकर्मत्वादिप्रकृतार्थापेक्षः, सामान्यापेक्षप्रत्ययनियमपक्षस्याऽसम्भवोऽनेन वार्तिकपूर्वार्धेन बोध्यते। एकत्वाद्यर्थान्तरस्यापि सत्त्वे कर्मत्व एव द्वितीयेति नियमायोगात्। अनेनैवाशयेन सुपां तिङां चार्थद्वयं प्रदर्शितं वार्तिककृता। अतोऽर्थनियमः प्रकृतार्थापेक्षप्रत्ययनियमश्चेति द्वयमेवात्र वार्तिके प्रदर्शितम्।



जात्यादिपञ्चकं प्रातिपदिकस्यैव वाच्यम्। तादृशप्रातिपदिकात् परत्वेन सामान्यसूत्रेण विधीयमानाः प्रत्ययाः 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ती'ति परिभाषया प्रातिपदिकार्थ एव प्रवर्तन्ते। अनया रीत्या स्वौजसित्यादि सामान्यशास्त्रेणैव सर्वेष्वर्थेषु सुपां विधानसम्भवात् पुनरारभ्यमाणानि 'कर्मणि द्वितीयेत्यादीनि 'कर्मण्येव द्वितीया' 'द्वित्व एव द्विवचनम्' इति नियमार्थानि भवन्ति। अन्यथा कर्माद्यर्थेऽपूर्वतया द्वितीयादिविधानार्थतया तेषां नियामकत्वाभावेन नियामकत्वप्रतिपादनं भगवतोऽसङ्गतं स्यात्।

तत्र कैयटेनाप्येवमुक्तम् - सुपस्तावत् स्वार्थे विधीयमानाः स्वार्थद्रव्यलिङ्गसंख्याकारकलक्षणः पञ्चकः प्रातिपदिकार्थः इति दर्शने संख्यायां सिद्धाः इति।

विभक्तीनां द्योतकत्वादेव दधि , वारि ,राजा इत्यादिषु प्रवृत्तिनिमित्त-तदाश्रय-लिङ्ग-संख्या-कारक- रूपसर्वार्थविषयकबोधो जायते । अन्यथा तत्र सोः लुप्तत्वेन वाचकत्वपक्षे जातिव्यक्त्योः प्रकृत्या बोधेऽपि वाचकस्य प्रत्ययस्याभावाल्लिङ्गादित्रयस्य बोधानापत्तिः।

३२. क्रीतात्करणपूर्वात् इति सूत्रभाष्यम्

करणपूर्वादिति किमर्थम् ? गवा क्रीता , अश्वेन क्रीता । करणपूर्वादित्युच्यमानेऽप्यत्र प्राप्नोति ,एषोऽपि क्रीतशब्दः करणपूर्वः । विभक्त्या व्यवधानान्न भविष्यति । करणं पूर्वं यस्मादिति बहुव्रीहिः पञ्चम्यर्थे। पूर्वशब्दो व्यवस्थावचनः । अतः करणपूर्वादित्युक्तेऽपि प्रत्ययापत्तिरिति शङ्कितुराशयः । तृतीयाविभक्त्या व्यवधाना न्नायं क्रीतशब्दः करणपूर्वकः, अतो न ङीषिति समाधातुराशयः । अन्यथा गवा, अश्वेनेति समुदायस्यैव वाचकत्वेन तदसंगतिः स्पष्टैव । कर्मादीनां द्योतिका विभक्तय इति दर्शने इदमुच्यते । अन्यथा विभक्तेः करणाभिधानेन व्यवधानाभाव इति कैयटः। विभक्त्या करणत्वाभिधाने तु व्यवधानादिति भाष्यमसंगतं स्यात् । द्योतकत्वे तु विभक्तेरर्थावाचकतया प्रकृतेरेव तद्वाचकतया विभक्तेर्व्यवधायकतया करणपूर्वाभावान्न ङीषीति तद्संगतिः स्पष्टा।

३३. आख्यातपदस्यार्थविवरणम्

'भावप्रधानमाख्यातम्' इति निरुक्ते यास्काचार्यः । आख्यातपदस्यार्थ-विवरणं शास्त्रेषु बहुधा दृश्यते । यथा -

अ) तिङन्तमेवाऽख्यातपदेनोच्यत इति न्यायवार्तिककारः ।

आ) आख्यातपदेन तिङ्प्रत्ययो गृह्यत इति नव्यनैयायिकाः मीमांसकाश्च।

इ) आख्यातपदेन धातुरभिधीयत इति दीक्षितभूषणकारौ । (आख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेति व्युत्पत्त्या), नव्यन्यायवासनया आख्यातपदं तिङि प्रयुञ्जाते ।

ई) नियमतो जनकाकाङ्क्षं विभक्त्यन्तमाख्यातपदेनोच्यते । यथा - पचति, पपाच, गच्छति, एधितव्यम्, भुक्त्वा, कर्तुम्, पचतिरूपम्, एधामित्यादिनामरूपमप्याख्यातमेवेति नागेशभट्टः ।

आख्यातपदेन धातुः गृह्यते चेत्तदुपरि तिङादयो भवन्ति, तेषां पदत्वेन व्यवहारः । आख्यातपदेन तिङन्तस्य ग्रहणे तत्रांशद्वयं विद्यते । प्रकृत्यंशः, प्रत्ययांशः इति । तत्र प्रकृत्यांशो धातुभागः, प्रत्ययांशः तिङ्भाग; । तत्र विद्यमानस्य प्रकृत्यंशस्य कोऽवाऽर्थः ? इति विचारे धात्वर्थविचारः पर्यवस्यति । धात्वर्थविचारे दार्शनिकाः विवदन्ते ।

३४ धात्वर्थविषये दार्शनिकानामभिप्रायाः

अ) फलं, व्यापारश्च धात्वर्थः इति , कर्तृकर्मसंख्याकालास्तिङर्थाः इति वैयाकरणानां मतम् ।

आ) व्यापारमात्रं धात्वर्थः इति , फलं द्वितीयार्थः, आख्यातार्थः कृतिरिति प्राचीननैयायिकाः ।

इ) फलव्यापारयोः धात्वर्थत्वमङ्गीकुर्वन्ति नव्यनैयायिकाः। कृतिराख्यातार्थः।

ई) मीमांसकेषु प्राभाकराः - फलमेव धात्वर्थः, लिङ् - लोट् - तव्यभिन्नेषु लकारादिषु भावना न वाच्यैव इति ।

उ) मण्डनमिश्राः फलं धात्वर्थ इति, व्यापारः प्रत्ययार्थ इति वदन्ति ।

ऊ) फलं , तदनुकूलव्यापारो धात्वर्थः , तदनुकूलव्यापारसामान्यमाख्यातार्थः इति पार्थसारथिमिश्राणामाशयः ।

ऋ) फलं , तदनुकूलव्यापारो धात्वर्थः, तदनुकूलकृतिराख्यातार्थः इति खण्डदेवाचार्याणामाशयः ।

तिङन्तपदेषु भासमानेषु पदार्थेषु फल-व्यापार-कर्तृ-कर्म-संख्या-कालेषु कस्यार्थस्य को वाचकः? इति विषये विप्रतिपत्तयो विद्यन्ते। प्रायः सर्वे फलस्य धात्वर्थत्वमङ्गीकुर्वन्ति। यद्यपि प्राचीननैयायिकैः फलस्य धात्वर्थत्वं नाभ्युपगतम्, नवीनैः तन्मतखण्डनात् फलस्य धात्वर्थत्वं सर्वदार्शनिकसम्मतमिति प्रतिभाति। तत्र किं नाम फलम्? को वा व्यापारः? इति जिज्ञासायां फलस्वरूपनिर्णयाय प्रयत्यते।

३५. फलस्वरूपनिरूपणम्

स्वरितञितः कर्त्रभिप्राये क्रियाफले (१-३-७२) इति सूत्रे फलपदं विद्यते। तस्य प्रवृत्त्युद्देश्यं मुख्यं फलमर्थः। तादृशं फलं यजेः स्वर्गो भवति, पचेश्च भोजनं भवति। तत्स्वरूपं वाक्यपदीये भर्तृहरिणा एवमुक्तम्-

यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः।

तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम्।। (वा उप स १८)

कारिकोक्तार्थस्य फलस्य धातुवाच्यत्वाभ्युपगमे तदाश्रयस्य कर्मत्वापत्तिः, विक्लित्त्याद्याश्रयस्य ओदनादेः कर्मत्वानापत्तिश्चेत्याशयेन भूषणकारः'फलं विक्लित्त्यादि' इत्यलिखत्। तस्यायमाशयः - फलपदं नात्र लौकिकफलपरम्, किन्तु पारिभाषिकम्। तच्च कर्मकृत्प्रत्ययासमभिव्याहारे तद्धात्वर्थविशेषणत्वे सति तद्धात्वर्थत्वम् इति। पच धातोः' विक्लित्त्यनुकूलव्यापारोऽर्थः'। अतः 'चैत्र स्तण्डुलं पचति'इत्यत्र विक्लित्त्यनुकूलव्यापारस्य धात्वर्थत्वेन तत्र विशेषणत्वेन विद्यमानायाः विक्लित्तेः फलत्वात्तदाश्रयत्वेन तण्डुलस्य कर्मत्वं सिद्ध्यति। एतादृशलक्षणस्वीकाराल्लौकिकफलस्याग्रहणात् भोजनादौ नातिव्याप्तिः। तद्धात्वर्थविशेषण- त्वञ्च तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्। तेन 'पश्य मृगो धावति' इत्यत्र मृगकर्तृकधावनकर्मकं दर्शनम् इति बोधाद् धावनस्य दृश्यर्थविशेषणत्वेऽपि तद्धात्वर्थनिष्ठविशेष्यतानिरूपित-प्रकारतावत्त्वाभावेन धाव्धात्वर्थस्य फलत्वं न। अन्यथा धाव्धात्वर्थस्य फलत्वेन तदाश्रयस्य मृगस्य कर्मत्वापत्तौ द्वितीयापत्तेः।

न च दर्शने धावनस्यान्वयात्प्रागेव मृगस्य धावनक्रियायामन्वयात् अन्तरङ्गत्वाद्धावनक्रियाश्रयत्वेन मृगस्य कर्तृत्वात्तत्संज्ञया कर्मसंज्ञायाः बाधान्न द्वितीयापत्तिरिति वाच्यम्।

अन्तरङ्गादपि 'प्रधानकार्यं बलवत्' इति 'हेतुमति च (३-१-२६) इति सूत्रे भाष्ये प्रतिपादितत्वेन कर्मसंज्ञाया एव बलवत्त्वात्। तथाहि -

पश्य मृगो धावति इत्यत्र प्रधानकार्यं दृश्धात्वर्थनिरूपितं कार्यम्। अत स्तद्दृष्ट्या धावनस्य विशेषणत्वेन फलत्वात्, तदाश्रयत्वेन मृगस्य कर्मत्वं दुर्वारमेव। अतो मृगस्य कर्मत्वनिवारणार्थं तद्धात्वर्थेत्यावश्यकमेव। एतन्नियम-स्वीकारादेव 'पक्त्वौदनो मया भुज्यते' इत्यत्र प्रधानभुजिक्रियानिरूपिताभिहित-कर्मत्वाश्रया प्रथमैव, न तु गुणीभूतपचिधात्वर्थक्रियानिरूपितानभिहित-कर्मत्वनिबन्धना द्वितीया।

अन्तरङ्गादपि प्रधानकार्यं बलवत् इति न्यायस्य स्वीकारादेव गत्यादिसूत्रस्य भाष्योक्तं नियामकत्वं सङ्गच्छते। तथाहि - चैत्रः ग्रामं गच्छति इत्यत्र गमेः सयोगानुकूलव्यापारोऽर्थः। अत्र संयोगरूपफलाश्रयत्वेन ग्रामस्य 'कर्तुरीप्सिततमं कर्म'(१-४-४९) इत्यनेन कर्मत्वाद्द्वितीया सिद्ध्यति। तथैव णिजन्तस्थले चैत्रः मैत्रं ग्रामं गमयति इत्यत्र गमयतेः संयोगानुकूल-व्यापारानुकूलव्यापारोऽर्थः। अत्र द्वे फले, द्वौ व्यापारौ च स्तः। संयोगः एकं फलम्, तदनुकूलव्यापारः फलान्तरम्। एवमेव प्रयोजकव्यापार एकः, प्रयोज्यव्यापारोऽपरः। प्रयोज्यव्यापारस्यान्तरङ्गत्वेन तदाश्रयत्वात् प्रयोज्यस्य कर्तृत्वे, तत्र कर्मत्वसम्पादनार्थं 'गतिबुद्धि - इत्यादि सूत्रं विधायकं स्यात्। एतन्न्यायस्वीकारात् प्रयोज्यस्यान्तरङ्गकर्तृत्वापेक्षया प्रधानक्रिया-निरूपितकर्मत्वस्य बलीयस्त्वेन प्रयोज्यस्य फलाश्रयत्वेन 'कर्तुरीप्सिततमं कर्म' (१-४-४९) इत्यनेन कर्मत्वसिद्धौ 'गतिबुद्धिप्रत्यवसानार्थ-शब्दकर्माकर्मकाणामणि कर्ता स णौ'(१-४-५२) इति सूत्रं 'सिद्धे सत्यारभ्यमाणो विधि र्नियमाय भवती'ति न्यायेन नियमार्थं भवति। तेन पाचयति योगे प्रयोज्यस्य कर्मत्वं न, यथा - चैत्रः मैत्रेण पाचयति इति।

कर्मकृदन्तस्थले 'पक्वः' इत्यादौ फलविशेष्यकबोधः 'व्यापारजन्या विक्लित्तिरिति। पक्वस्तण्डुल श्चैत्रेण इत्यत्र चैत्रकर्तृकव्यापारजन्य-विक्लित्त्याश्रयाभिन्न स्तण्डुलः' इति बोधो भवति। अत्र व्यापारस्य

विशेषणत्वेऽपि तदाश्रयस्य चैत्रस्य न कर्मत्वम्, लक्षणे कर्मकृत्प्रत्ययासमभिव्याहारे'इति कथनात्।

३६. सप्रमाणं फलस्य धात्वर्थत्वप्रतिपादनम्

फलस्य धात्वर्थत्वप्रतिपादने अधो लिखितानि भाष्याणि प्रमाणानि भवन्ति। तानि यथा -

१ कर्मवत्कर्मणा तुल्यक्रियः (३-१-८७)

२ सुप आत्मनः क्यच् (३-१-८)

३ भूवादयो धातवः (१-३-१)

४ हेतुमति च (३-१-२६)

१. कर्मवत्कर्मणा तुल्यक्रियः (३-१-८७) -कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवद् भवतीति सूत्रार्थः। अत्र कर्मणेत्यत्र कर्मपदेन कर्मस्थक्रियैव गृह्यते। तथा चोक्तं कैयटेन ''कर्मणेति। कर्मस्थया क्रिययेत्यर्थः। साध्यसाधनयोरत्यन्तभेदात्तुल्यत्त्वासम्भवात् कर्मस्था क्रिया कर्मशब्देनोच्यते इति। सा च कर्मस्था क्रिया फलरूपैव, न तु व्यापाररूपा। उक्तं च कैयटेन तत्रैव 'धातुवाच्यक्रिया कर्तृकर्मणोः समवेता, तत्र कर्तृस्थया क्रियया तुल्यक्रियः कर्ता न सम्भवतीति कर्मस्थैव क्रियाऽऽश्रीयत इति। सा च कर्मस्था क्रिया धातुवाच्या किमित्याकाङ्क्षायां फलमेव स्वीकार्यं, न तु व्यापारः, कर्मनिष्ठव्यापारस्य धातुवाच्यत्वाभावात्। अतोऽनेन भाष्येण फलस्य धात्वर्थत्वं लभ्यते।

२. सुप आत्मनः क्यच् (३-१-८) -क्यञ्विधायकसूत्रमेतत्। पुत्रमात्मनः इच्छतीत्यर्थे पुत्रीयतीति प्रयोगो भवति। तथा 'इष्यते पुत्रः' इत्यर्थे पुत्रीयतीति न प्रयोगो भिन्नार्थत्वात् इति। तथा हि - अथेह क्यचा भवितव्यम्, इष्टः पुत्रः, इष्यते पुत्रः? इह भवन्त स्तावदाहुः न भवितव्यमिति। किं कारणम्? समानार्थेन वाक्येन भवितव्यम्, प्रत्ययान्तेन च। यश्चेहार्थो वाक्येन गम्यते ''इष्टः पुत्रः, इष्यते पुत्रः इति,नासौ

जातुचित्प्रत्ययान्तेन गम्यते' इति। एवञ्च कर्मणि प्रत्यये भिन्नार्थत्वान्न क्यजिति भाष्याशयः।

अत्रेदमवधेयम् - फलस्य धात्वर्थत्वाभावे 'इष्यते पुत्रः, पुत्रीयति' इत्युभयत्रापि व्यापारमुख्यविशेष्यकशाब्दबोधसम्भवात्, तयो र्भिन्नार्थत्वं दुरुपपादमेव। समानविशेष्यकबोधस्य समानार्थत्वेन भिन्नार्थत्वासम्भवात्। फलस्य धात्वर्थत्वे तु कर्मणि प्रत्यये फलविशेष्यकबोधः, कर्तरि प्रत्यये व्यापारविशेष्यकबोध इति वाक्यप्रत्ययान्तयो र्भिन्नार्थत्वं सम्भवति। उक्तं च तत्रैव प्रदीपव्याख्याने कैयटेन - यदा क्रियाफलस्य कर्मणः प्राधान्यं प्रतिपिपादयिषितम्, तदा वाक्यमेव प्रयुज्यते 'इष्टः पुत्रः'इति, न तु क्यजन्त इति। पूर्वोक्तकैयटवचनेन फलस्य धात्वर्थत्वं, कर्मणि प्रत्यये तस्य प्राधान्यञ्च सिद्ध्यति।

३. भूवादयो धातवः (१-३-१) -तत्र हि - इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते पच्छब्दश्चकारान्त अतिशब्दश्च प्रत्ययः। अर्थोऽपि कश्चिद्गम्यते - विक्लित्तिः, कर्तृत्वमेकत्वं च'। विक्लित्तिरूपफलस्य धात्वर्थत्वम नेन स्पष्टतयोक्तम्।

४. हेतुमति च (३-१-२६) - सूत्रेऽस्मिन् भाष्यकार एवमाह - इह पचेः कः प्रधानार्थः? याऽसौ तण्डुलानां विक्लित्तिरिति।

३७. फलस्य धात्वर्थत्वे वाक्यपदीयकारसम्मतिः

अष्टाध्याय्यां 'साधकतमं करणम् (१-४-४१) इति सूत्रं विद्यते। सूत्रेऽस्मिन् तमब्ग्रहणमस्ति। तमबर्थः प्रकर्षः। प्रकृष्टत्वञ्च यद्व्यापारानन्तरं क्रियासिद्धि र्भवति तत्। करणत्वञ्च -

क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्।। (वा सा २०१)

इति वाक्यपदीये उक्तम्। यद्व्यापारादनन्तरं क्रियासिद्धिः विवक्ष्यते तत् करणं भवति। अत एव 'रामेण बाणेन हतो वालीत्यत्रोभयोः क्रियासाधकत्वे समानेऽपि बाणस्यैव करणसंज्ञा, न तु रामस्य। सा च क्रिया का? यस्याः

सिद्धिः करणव्यापारानन्तरं भवतीति प्रश्ने क्रियापदेन फलमेव गृह्यते, व्यापारानन्तरं फलस्यैव जायमानत्वात्। यद्यत्र क्रियापदेन व्यापारो गृह्येत, तदा कर्तृवृत्तिव्यापारानन्तरं कर्मनिष्ठव्यापारस्य जायमानत्वात् कर्तुरपि करणत्वापत्तिः। अतः क्रियाफलमेव ग्राह्यम्। तच्च फलं धातुवाच्यत्वे सति धातुवाच्यव्यापारजन्यमेव, न तु 'स्वरितञितः' इत्यादिसूत्रबोधितं लौकिकं फलम्। तथा च सूत्रेऽस्मिन् तमब्ग्रहणकर्तुः पाणिनेः करणत्वलक्षणं प्रतिपादयितुः भर्तृहरेरपि फलस्य धात्वर्थत्वं निश्चप्रचम्।

३८ कौमुदीकाराणामाशयः

श्रीमान् भट्टोजीदिक्षितः 'वैयाकरणमतोन्मज्जनम्' नाम्ना चतुस्सप्ततिकारिकाभिः संवलितं ग्रन्थमेकं रचयामास। तत्र धात्वर्थ-लकारार्थ-सुबर्थादिविचाराः प्रस्तुताः। तत्र धात्वर्थविषये एषा कारिका विद्यते। यथा-

फलव्यापारयोर्धातु, राश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापार, स्तिङर्थस्तु विशेषणम्।।

फलव्यापारयोरित्यत्र वाचकत्वेनेत्यध्याह्रियते। स्मृता इत्यस्यावृत्त्या एकवचनान्तेन विपरिणामः। एवञ्च धातुः फलव्यापारयो र्वाचकत्वेन स्मृतः। अत्र फलव्यापारयोरिति द्विवचननिर्देशेन फले व्यापारे च पृथक् शक्तिरिति तेषामाशयः। अत एव फलस्य व्यापारेऽनुकूलतासम्बन्धेनान्वयः। फलानुकूलो व्यापार इत्यर्थः। तेनैव सिद्धान्तकौमुद्यां धात्वर्थनिर्देशः कृतः। यथा -ष्ठा गतिनिवृत्तौ अत्र गतिनिवृत्तिः फलमेव। एवञ्च फलमेवात्र धात्वर्थत्वेन निर्दिष्टम्। भणितञ्च माधवीयधातुवृत्तौ सकर्मकत्वाकर्मकत्वनिरूपणप्रसङ्गे यथा - ष्ठा गतिनिवृत्तौ । अत्र फलं गतिनिवृत्तिः, व्यापारस्तदनुकूल इति।

३९. फलस्य धात्वर्थत्वे भूषणकाराशयः

भूषणकारोऽपि स्वपितृव्यं भट्टोजीदीक्षितमनुससार। तेन धातोः फलावाचकत्वे इमे दोषाः उपस्थाप्यन्ते।

१. सकर्मकत्वोच्छेदापत्तिः।

२. क्रियते घटः स्वयमेव' इति प्रयोगो न स्यात्।

३. त्यजिगम्योः पर्यायतापत्तिः।

४. द्व्यर्थः पचिः' इति भाष्यनिर्देशासङ्गतिः।

१. सकर्मकत्वोच्छेदापत्तिः - फलस्य धात्वर्थत्वाभावे स्वार्थफलव्यधिकरण-व्यापारवाचकत्वमिति लक्षणमेव न घटते, स्वार्थफलस्यैवाऽभावात्। फलव्यापारोभयवाचकत्व एव फलव्यधिकरणव्यापारवाचकत्वं सम्भवति।

२. क्रियते घटः स्वयमेव'- दर्शनान्तरीयरीत्या कृञ् धातोर्यत्नमात्रार्थकत्वे 'यती प्रयत्ने' इतिवत् फलस्थानीययत्नवाचकत्वेनाकर्मकत्वात् कर्मवद्भावाप्राप्तौ 'क्रियते घटः स्वयमेव' इति प्रयोगो न स्यात्। अत उत्पत्तिरूपफलानुकूलव्यापार एव कृञ् धात्वर्थः स्वीकरणीयः। तथा च 'पच्यते ओदनः स्वयमेवेतिवत्' क्रियते घटः स्वयमेवेत्यत्रापि कर्मवत्कर्मणा तुल्यक्रियः (३-१-८७) इत्यनेन कर्मवद्भावे कृते यगादय उत्पद्यन्ते। तत्र कृञ इति धातुमात्रोपलक्षणम्। अतः सर्वेषां धातूनां फलव्यापारोभयवाचकत्वमङ्गीकर्तव्यम्।

३. त्यजिगम्योः पर्यायतापत्तिः- त्यजेः विभागानुकूलो व्यापारोऽर्थः। गमेश्च संयोगानुकूलो व्यापारोऽर्थः। फले उभयो वैलक्षण्यं विद्यते। फलस्य धात्वर्थत्वाभावे तु व्यापारवाचकत्वस्योभयत्रापि तुल्यत्वेन समानार्थतापत्तिः। आह च भूषणकारः - धातूनां फलावाचकत्वे त्यजिगम्योः पर्यायतापत्तिः, क्रियावाचकत्वाविशेषात्।

४. द्व्यर्थः पचिः- 'कर्तुरीप्सिततमं कर्म'(१-४-४९) इति सूत्रे भाष्ये एवमाह - द्व्यर्थः=फलव्यापारोभयार्थकः, पचिः= पचधातुरित्यर्थः।

४०. मञ्जूषाकाराणामाशयः

नागेशभट्टोऽपि फलस्य धात्वर्थत्वं मनुते। परं फले, व्यापारे च पृथक् शक्तिं नेच्छति, किन्तु एकैव शक्तिः। कर्तृप्रत्ययसमभिव्याहारे फलावच्छिन्ने व्यापारे शक्तिः, कर्मप्रत्ययसमभिव्याहारे व्यापारावच्छिन्ने फले । यद्यपि

पृथक् शक्तिकल्पनाप्रयुक्तं गौरवमस्ति, तथापि फलमुखगौरवत्वेनादोषात्। धात्वर्थनिर्णये मञ्जूषाकार एवमभिप्रैति - तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे-तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वं फलत्वम्। विभागजन्यसंयोगरूपे पतत्यर्थे विभागसंयोगयोः फलत्ववारणायोभयम्। इति। विक्लित्तौ समन्वय इत्थम् - पचधातोः विक्लित्त्यनुकूलव्यापारोऽर्थः। तत्र विक्लित्तिः फूत्कारादिव्यापारजन्या भवति, तथा पचतीति कर्तृप्रत्ययसमभिव्याहारे धात्वर्थः = विक्लित्त्यनुकूलव्यापारः, तन्निष्ठा या विशेष्यता = व्यापारनिष्ठा विशेष्यता, तन्निरूपिता या प्रकारता = विक्लित्तिनिष्ठा प्रकारता, तद्वत्त्वं = विक्लित्तौ। अतो विक्लित्तिः फलं भवति। फलाश्रयत्वेन तण्डुलानां कर्मसंज्ञायां 'कर्मणि द्वितीया (२-३-२) इत्यनेन द्वितीया सिद्ध्यति। पतधातोः विभागजन्यसंयोगोऽर्थः इति स्वीकारे संयोगस्य प्रकारत्वाभावात्, विभागस्य तद्धात्वर्थजन्यत्वाभावाच्च न दोषः। तत्र विभागसंयोगयोः पततिफलत्वे 'वृक्षात् पर्णं पततीत्यादौ वृक्षादीनां फलाश्रयत्वेन प्राप्तापादानत्वबाधनेन कर्मत्वापत्तिः।

सकर्मकलक्षणमपि नागेशभट्टः एवं भणति यद्'एतच्छास्त्रीयकर्म-संज्ञकार्थान्वय्यर्थकत्वम्'इति। अत एव वैकुण्ठमधिशेते, अधितिष्ठति, अध्यास्ते' इत्यत्र शीङ्, ष्ठा, आस् एतेषाम् अकर्मकत्वेऽपि 'अधिशीङ्स्थाऽऽसां कर्म (१-४-४६) इति सूत्रबोधितत्वेन कर्मसंज्ञा सिद्ध्यति। एतन्मतरीत्या सकर्मकलक्षणे साक्षात्फलाप्रवेशेऽपि तत्र विद्यमानकर्मफलात् फलवाचकत्वमनिवार्यमेव। यतो हि फलस्य धात्वर्थत्वं विना कर्मसंज्ञैव दुरुपपादा। तथाहि - कर्मसंज्ञाविधायकं सूत्रं 'कर्तुरीप्सिततमं कर्म'(१-४-४९) इति। क्रिया नाम या कापि क्रिया, फलं यत्किञ्चिदिति स्वीकारे यदा पुष्ट्यर्थं 'माषक्षेत्रेऽश्वं बध्नाति' तदा माषाणां कर्मत्वापत्तिः, बन्धनक्रियया माषाणामपीष्टत्वात्। कर्तृनिष्ठक्रियाजन्यफलमिति कथनान्माषाणां कर्मसंज्ञा वार्यते। तथाहि- कर्ता = चैत्रः, तन्निष्ठो यो व्यापारः = बन्धनानुकूलो

व्यापारः, तज्जन्यं यत् फलम् = अस्वातन्त्र्यम्, तदाश्रयः = अश्वः, अतस्तस्य कर्मसंज्ञायां द्वितीया भवति। माषाणां तु प्रसक्तिरेव न।

एवमेव 'अग्ने र्माणवकं वारयति' इत्यत्रापि उत्तरदेशसंयोगानुकूल-व्यापाराभावानुकूलव्यापाररूप धात्वर्थक्रियया अग्निमाणवकयोरुभयोरपि कर्तुरिष्टत्वाद् कर्मसंज्ञा प्राप्ता। तथा सति 'वारणार्थानामीप्सितः (१-४-२७) इति सूत्रं निरवकाशं भूत्वा अपवादत्वात् प्रवर्तेत। तथा चाग्निमाणवकयोरुभयोरपि अपादानसंज्ञां विधास्यतीति माणवकशब्दादपि पञ्चम्यापत्तिः, तन्मा भूद् इत्येतदर्थं कर्तृवृत्तिव्यापारविशिष्टफलवत्वप्रकारके-च्छोद्देश्यताश्रयकं कारकं कर्मसंज्ञं भवति। व्यापारस्य फले वैशिष्ट्यञ्च - स्ववाचकधातुवाच्यत्वस्वप्रयोज्यत्वैतदुभयसम्बन्धेनेति कर्मसंज्ञासूत्रस्यार्थो वर्णनीयः। उक्तञ्च - स्वप्रयोज्यत्वस्ववाचकधातुवाच्यत्वरूपोभयसम्बन्धेन व्यापारविशिष्टफलवत्त्वरूपसम्बन्धः 'आप्' धात्वर्थः इति। एवञ्च फलस्य धात्वर्थत्वाभावे कर्मसंज्ञैवाऽनुपपन्ना, कर्मसंज्ञाविधायकसूत्रार्थे स्ववाचकधातुवाच्यत्वसम्बन्धेन व्यापारस्य फले वैशिष्ट्यावश्यकत्वात्। अत एवोक्तम् - कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमिति निष्कृष्टमतेऽपि फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफल एवान्वयौचित्येन द्योतकत्वमावश्यकम् इति।

४१ व्यापारलक्षणम्

वाक्यपदीयकाराणामाशयः

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते।। (वा क्रि १)।।

अस्यार्थः - सिद्धम् = निष्पन्नम्, भूतम्। असिद्धम् = अनिष्पन्नम्, वर्तमानं भविष्यच्च। वर्तमानत्वं हि प्रारब्धापरिसमाप्तत्वरूपमिति वर्तमानमपि असिद्धान्तर्गतमेव। तदेवं सिद्धमसिद्धं वा यावत्साध्यत्वेन =

क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपेण = असत्त्वभूतत्वेनाभिधीयते, तत्सर्वं क्रियेत्यभिधीयते। तत्र हेतुः आश्रितक्रमरूपत्वादिति। सर्वा हि क्रिया लोके क्रियाणां समुदायरूपैव प्रसिद्धा। यथा - आरोहणम्, अवरोहणम्, गमनम्, आगमनम् पाक इत्यादि। सत्ता वर्तमानत्वादिरूपापि क्रिया क्रमेणैव निष्पद्यत इति कर्त्रा क्रमेण क्रियमाणत्वात् =क्रिया। आश्रितं क्रमरूपं यया सा = आश्रितक्रमरूपा, तस्याः भावः = आश्रितक्रमरूपत्वम्, तस्मात् = आश्रितक्रमरूपत्वात्।

४२. साध्यक्रियालक्षणम्

साध्यत्वञ्च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वरूपम्। अन्या क्रिया = क्रियान्तरमिति मयूरव्यंसकादित्वात्समासः। आकाङ्क्षा अस्या अन्वयिनी क्रिया का? इति इच्छारूपा क्रियान्तरविषयिणी आकाङ्क्षा। सा च पाकः, कृतिः, इत्यादिकृदन्तोपस्थाप्यक्रियायां दृश्यते, यथा - पाकः इति कृदन्तपदश्रवणेऽभूत्, भविष्यति, भवति वेत्यादि क्रियान्तराकाङ्क्षाऽनुभूयते। पचति, करोति, इत्यादितिङन्तश्रवणे तादृशी क्रियान्तराकाङ्क्षा नानुभूयते। कः, किं केनेत्यादिकारकाकाङ्क्षा एव दृश्यते। अस्या एवाऽसत्त्वभूतक्रिया इत्यपि व्यवहारः। उक्तञ्च वाक्यपदीये हरिणा -

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। (वा क्रि ४७)

४३. भूषणकाराणामाशयः

व्यापारस्तु भावनाभिधा साध्यत्वेनाऽभिधीयमाना क्रियेति भूषणकारः। तस्यायमाशयः - भावनापरनामिका साध्यत्वेन रूपेण वाच्या या क्रिया स व्यापार इति । लक्षणेऽत्र भावनापरनामिका इति कथनाद् भवितुः विक्लित्त्यादेः भवनानुकूलः फूत्कारादिरेव भावनाशब्देनोच्यते । अतः क्रियापदस्य क्रियतेऽसाविति कर्मव्युत्पत्त्या फलपरत्वेऽपि तस्य भावनाशब्देन व्यवहाराभावान्न दोषः । व्यापारः क्रिया इत्येतावन्मात्रोक्तौ परिस्पन्दरूपार्थस्यैव

प्रतीत्यापत्तौ तिष्ठति, भवति, पुत्रीयतीत्यादावव्याप्तिः । अतः साध्यत्वेनाभिधीयमानेति । पूर्वोक्तेषु त्रिषु स्थलेषु प्रकृत्यर्थस्य साध्यत्वेन भानान्नाव्याप्तिः । पुत्रीयतीत्यत्रापि शब्दशक्तिस्वभावात् प्रकृत्यर्थस्य साध्यत्वेन भानम्, अत एव व्याकरणस्य सूत्रं करोति इत्यत्र वाक्ये सम्बन्धेनाऽन्वितस्यापि व्याकरणपदार्थस्य व्याकरणं सूत्रयति इत्यत्र कर्मत्वम्। क्रियापदबोध्यक्रियायामतिव्याप्तिवारणार्थं साध्यत्वेनेति, अत्र सिद्धत्वेन क्रिया भासते, न तु साध्यत्वेन । साध्यत्वं 'उत्पाद्यत्वमेवे' ति भूषणकाराणामाशयः। साध्यक्रिया असत्त्वभूतक्रियेत्यनर्थान्तरम्। उक्तञ्च भूषणसारे -

असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते । इति वाक्यपदीयादिति।

तस्या अयमर्थः - पद्यतेऽनेनार्थ इति व्युत्पत्त्या पदशब्दः प्रत्ययपरः। तिङः पदानि (प्रत्ययाः) येभ्यः = तिङ्पदैः, अत्राऽतद्गुणसंविज्ञानबहुव्रीहिः। अत स्तिङ्पदशब्दः धातुपरः । एवञ्च तिङ्पदैः = धातुभिः, असत्त्वभूत एव भावो = भावनाऽभिधीयते । अयमेवाशयो भट्टोजीदीक्षितस्यापि ।

४४. शब्दरत्नकाराणामाशयः

शब्दरत्नकार एवमभिप्रैति - क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वं साध्यक्रियायाः लक्षणं न भवति, क्रियाघटितत्वेनाऽऽत्माश्रयप्रसङ्गात् इत्यमुमेवाशयं मनसि निधाय 'भूवादयो धातवः (१-३-१) इति सूत्रे शब्दरत्ने - क्रियात्वञ्च साध्यत्वेन प्रतीयमानत्वम् । साध्यत्वं चोत्पाद्यमानत्वमेवेत्यन्यत्र विस्तरः इति ।

मञ्जूषाकारोऽपि धात्वर्थवादे 'अत्र केचिदित्यादिना- साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वं तद्वैजात्यं तद्रूपमित्युक्त्वा' वस्तुतस्तु साध्यत्वं निष्पाद्यत्वमेव, तद्रूपेणैव बोधादित्यवादीत् । विचार्यमाणे भूषणकृन्नागेशयो र्नात्र मतभेदोऽस्ति । अत एव वस्तुतस्तु साध्यत्वं निष्पाद्यत्वमेवेत्युक्तं मञ्जूषाकारेण । अन्यथा 'परे तु ' इत्येवावक्ष्यत् नागेशभट्टः ।

४५. व्यापारस्य धात्वर्थत्वप्रतिपादनम्

व्यापारं विना धातुसंज्ञैव न भवति । धातुसंज्ञाविधायकं सूत्रं विद्यते- 'भूवादयो धातवः (१-३-१) इति । तेन क्रियावाचिनां भ्वादिगणपठितानां धातुसंज्ञा विधीयते । एवञ्च क्रियावाचित्वमन्तरेण धातुसंज्ञैव न सिध्यति ।

परोक्षे लिट् (३-२-११५) इति सूत्रे भाष्ये 'कः पुनः धात्वर्थः ? क्रिया ।' इति स्पष्टमुक्तम् ।

समानकर्तृकयोः पूर्वकाले (३-३-१५८) इति सूत्रेण समानकर्तृकयोः क्रिययोः पूर्वकालवृत्तिक्रियायां वर्तमानाद्धातोः क्त्वाप्रत्ययो विधीयते । व्यापारस्य धात्ववाच्यत्वे तदसङ्गतिः स्पष्टैव ।

४६. तिङर्थाः

कर्तृकर्मसंख्याकालास्तिङर्थाः । कर्तृप्रत्ययसमभिव्याहारे कर्तृसंख्याकालाः, कर्मप्रत्ययसमभिव्याहारे कर्मसंख्याकालाः भवन्ति ।

४७. कर्तृस्वरूपनिर्णयः

स्वतन्त्रः कर्ता (१-४-५४) इति सूत्रेण कर्तृसंज्ञा प्रतिपादिता । अत्र सूत्रे भाष्ये एवं विचारः प्रस्तुतः - किं यस्य स्वं तन्त्रं सः = स्वतन्त्रः? किं चातः, तन्तुवाये प्राप्नोति । नैष दोषः । अयं तन्त्रशब्दोऽस्त्येव विताने वर्तते । तद्यथा आस्तीर्णं तन्त्रं, प्रोतं तन्त्रमिति । वितानमिति गम्यते । अस्ति प्राधान्ये वर्तते । तद्यथा- स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते। स्वप्रधानेति गम्यते । तद्यः प्राधान्ये वर्तते तन्त्रशब्दः तस्येदं ग्रहणम्। यथाकथञ्चिद्व्युत्पन्नोऽयं तन्त्रशब्दः प्रधानार्थे रूढ इति उद्द्योतव्याख्याने नागेशभट्टः। क्रियासिद्धौ यः स्वतन्त्र इत्यर्थे प्राधान्यस्यैवान्वययोग्यत्वम्। स्वतन्त्रशब्दस्यैतादृशार्थपरत्वे 'कारके (१-४-२३) इति सूत्रस्थं भाष्यमपि प्रमाणम् -स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली स्वतन्त्रा इति। भाष्ये यत्नशब्देन व्यापारसामान्यं गृह्यते। यस्य व्यापारो धातुनाऽभिधीयते स एवासौ स्वतन्त्र इति भाष्याशयः।

४८. वाक्यपदीयकाराणामाशयः

प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्तनात् ।। (वा सा १०१)
अदृष्टत्वा त्प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते ।। (वा सा १०२)

कर्तुः वक्ष्यमाणैः षड्भिः विशेषैः प्राधान्यप्रयुक्तं प्रधानक्रियायां स्वातन्त्र्यं बोध्यते।

१. करणादिप्रवृत्तेः प्रागेव अन्यतः = अर्थित्वसामर्थ्योपर्युदस्तत्वादितः कर्तुः शक्तिलाभात्। न हि सहकारिभ्य एव कर्ता स्वव्यापारानुकूलां शक्तिमासादयति, करणादिप्रवृत्तेः प्रागेव तादृशशक्तिलाभात्। करणादीनां तु कर्तृगतप्रैषादेव स्वव्यापारे स्वातन्त्र्यम्, नान्यत इति कर्तुः करणादीनाञ्च विशेषः।

२. कर्त्रा करणादीनां न्यग्भावापादनादपि, स्वायत्तव्यापारकत्वेन आत्माधीनत्वापादनादपि कर्तुः स्वातन्त्र्यम्।

३. करणादीनां कर्त्रधीनप्रवृत्तिकत्वात्।

४. कर्ता फलार्थं प्रयतमानः स्वयं व्यापारवान्, न तु करणादिरूपसहकार्यधीन-प्रवृत्तिक इति, प्रवृत्तानां निवर्तनात्। फलप्राप्त्युत्तरमपि प्रवृत्तानि करणादीनि कर्ता निवर्तयति। कर्ता तु फलप्राप्त्युत्तरं स्वयं निवर्तते।

५. चोदितासम्भवे करणादीनां दर्भादीनां शरादिरूपप्रतिनिधिदर्शनेऽपि कर्तुः क्वापि प्रतिनिधेरदर्शनात्। प्रतिनिधीयमानस्यापि क्रियायामधिकारेण कर्तृत्वस्य मुख्यस्यैव सत्त्वात्।

६. कारकान्तराणामभावेऽपि 'अस्ति, भवति, विद्यते' इत्यादौ कर्तुर्दर्शनात्, कर्तुरभावे च करणादीनामदर्शनात्।

४९. भूषणकाराणामाशयः

कौण्डभट्टः सुबर्थनिर्णये भूषणसारे एवमाह - स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम्।'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते। इति वाक्यपदीयादिति।

वाक्यपदीयकारिकाया अयमर्थः - उक्ता = उपात्ता, क्रिया = व्यापारो, यस्मिंस्तत्, तस्मिन्, धातूपात्तव्यापाराश्रय इत्यर्थः। तादृशे कारके नित्यम् = सर्वदा, कर्तृता = कर्तृसंज्ञा, इष्यते भाष्यकृद्भिरिति भावः। 'स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली स्वतन्त्रा' इति कारके इति सूत्रे भाष्यकृत इति।

चैत्रस्तण्डुलं पचति, घटो भवति, इत्यादौ चैत्र,घटादौ पाकभवनादिरूपधात्वर्थव्यापाराश्रयत्वाल्लक्षणसमन्वयः। 'पाचयति चैत्रो मैत्रेण' इत्यत्र पाकस्य, णिजर्थस्य चोभयोरपि भिन्नधातूपात्तव्यापारत्त्वात्तदाश्रययोः प्रयोज्यप्रयोजकयोरुभयोरपि कर्तृत्वोपपत्तिः। गतिबुद्धी-त्यादि सूत्रस्य नियमार्थत्वात् पाचयति योगे प्रयोज्यस्य न कर्मत्वम्। व्यापारे धात्वर्थत्वविशेषणेन 'काष्ठेन तण्डुलं पचती' त्यादौ न 'काष्ठादेः स्वातंन्त्र्यम्। व्यापारपदोपादानाद् धात्वर्थफलाश्रये कर्मण्योदनादौ नातिव्याप्तिः। एवं च धात्वर्थव्यापाराश्रयः कर्ता इति लक्षणं निष्पन्नम्।

५०. मनोरमाशब्दरत्नकारयोराशयः

स्वतन्त्रः कर्ता (१-४-५४) इति सूत्रे प्रौढमनोरमायां 'प्रधानीभूतधात्वर्थं प्रत्याश्रयत्वं स्वातन्त्र्यम्' इति प्रदर्शितम्। प्राधन्यं च कर्तृप्रत्ययसमभिव्याहारे धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयधात्वर्थत्वमिति व्याख्याने शब्दरत्नकारः। कर्तृसंज्ञासूत्रे शब्देन्दुशेखरे वैयाकरणशिरोमणिना नागेशेन 'स्वातन्त्र्यं च प्रधानीभूतधात्वर्थाश्रयत्वमित्येव दीक्षिताशयः प्रदर्शितः। अयमत्र मनोरमाकाराशयो भवति यत् -

निवृत्तिप्रेषणं कर्म स्वक्रियावयवे स्थितम्।
निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते।। (वा सा ५६)

इति वाक्यपदीये उक्तम्। तत्र निवृत्तिप्रेषणं स्वक्रियावयवे स्थितं कर्म =

कर्मत्वे निवर्तमाने सति स्वे कर्तृत्वेऽवतिष्ठत इति योजना। निवृत्तिप्रेषणम् = त्यक्तप्रेषणम्, स्वक्रियावयवे = स्वनिष्ठकर्मतानियामक धातुवाच्यैकदेशे, फलरूपे, स्थितम् = अधीनतया स्थितं सत्, कर्मत्वे = कर्मसंज्ञायाम्, निवर्तमाने = प्रकृतधात्वर्थव्यापारव्यधिकरणफलाश्रयत्वाभावान्निवर्तमाने सति, स्वे = कर्तृत्वे, अवतिष्ठते = धात्वर्थाश्रयत्वादवतिष्ठते। अत्र पक्षे पचादीनां धातुत्वं तु भूतपूर्वभावनार्थत्वाद् बोध्यम्। एवञ्च 'निवृत्तिप्रेषणं कर्म' इति पक्षे धात्वर्थव्यापाराश्रयत्वरूपस्वातन्त्र्यलक्षणस्य कर्मकर्तर्यव्याप्तिरिति मनसि निधाय पूर्वोक्तलक्षणान्तरं प्रतिपादयामास। प्रधानीभूतधात्वर्थाश्रयत्व-रूपस्वातन्त्र्यस्य कर्मकर्तरि व्याहतत्वेन नाऽव्याप्तिः। धात्वर्थाश्रयत्वमा-त्रोक्तौ' चैत्रस्तण्डुलं पचतीत्यादौ धात्वर्थफलाश्रये तण्डुलादावतिव्याप्तिः। अतः प्रधानीभूतेति। मुख्यविशेष्यताश्रयत्वरूपप्राधान्यस्य चैत्रेण पाचयतीत्यादौ प्रयोज्यव्यापारेऽसत्त्वादव्याप्तिः, पक्व स्तण्डुलः चैत्रेणेत्यादौ विक्लित्त्यादौ फले सत्त्वादतिप्रसक्तिः, तत्रैव व्यापारेऽसत्त्वादतिव्याप्तिश्च। अतः प्राधान्यस्य परिष्कारमेवमकृत शब्दरत्नकारः - प्राधन्यं च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयधात्वर्थत्वरूपम्' इति। अत्र प्रकारतानाश्रयत्वमित्युक्ते प्रयोज्यव्यापारादावव्याप्तिः, विशेष्यतानिरूपित-प्रकारतानाश्रयत्वमित्युक्तेऽपि स एव दोषः, अतो धात्वर्थत्वमित्यन्तं विशेष्यम्। 'चैत्रः पचति, पश्य मृगो धावति'इत्यादावतिव्याप्तिवारणाय धात्वर्थे तत्त्वम्। तथा च प्रत्यासत्त्या तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वे सति तद्धात्वर्थत्वं लब्धम्। णिचो वाचकत्वेन ण्यन्तधातु-तत्प्रकृतिधात्वो र्भिन्नत्वेन तदुभयवाच्यव्यापारयोः कर्तृत्वसिद्धिः। पक्व स्तण्डुलो देवदत्तेनेत्यादौ फलस्यैव प्राधान्यात् फलनिष्ठविशेष्यतानिरूपितप्रकारतापन्नव्यापारस्य निरुक्तप्राधान्याभावात्तदाश्रयस्य देवदत्तादेः कर्तृत्वानापत्ति र्दोषः। अतः कर्तृप्रत्ययसमभिव्याहार इति । तदुपादाने तु तृजादिप्रत्ययसमभिव्याहारे देवदत्तादेः निरुक्तप्रधानीभूतधात्वर्थाश्रयत्वस्य सत्त्वेन तदादायात्रापि कर्तृत्वोपपत्तिः स्पष्टैव ।

ननु धात्वर्थनिष्ठप्रकारतानिरूपकधात्वर्थत्वं प्राधान्यमित्येव सिद्धे प्रकारतानाश्रयत्वनिवेशः किमर्थ इति चेत् -

उच्यते निवृत्तिप्रेषणं कर्मेति पक्षे तण्डुलः पच्यते स्वयमेवेत्यादौ धात्वर्थे प्रकारताया अभावेन विशिष्टाभावात्तस्य प्राधान्यानापत्त्या तदाश्रयस्य तण्डुलादेः कर्तृत्वानापत्तिः । तादृशप्रकारतानाश्रयत्वनिवेशे तु कर्मकर्तरि धात्वर्थे विशिष्टमादाय तादृशप्रकारतानाश्रयत्वस्य सत्त्वेन प्रधानतया तदाश्रयस्य कर्तृत्वं सिध्यति ।

न च कर्तृलक्षणे कर्तृप्रत्ययसमभिव्याहार इति कर्तुः प्रवेशेनात्माश्रयापत्तिः। अतः कर्मप्रत्ययासमभिव्याहारे धात्वर्थनिष्ठविशेष्यता-निरूपितप्रकारतानाश्रयधात्वर्थत्वं प्राधान्यम् । तदुपहितव्यापाराश्रयत्वं कर्तृत्वमिति विवक्षणान्न दोष इति वाच्यम् ।

तथा सति कर्तृलक्षणे कर्मणः, कर्मलक्षणे कर्तुश्च प्रवेशेनान्योन्याश्रयस्य दुर्वारत्वात् कर्तृप्रत्ययसमभिव्याहार इत्यनेन कर्तृवाचकतृजादिप्रत्यय-समभिव्याहार इत्यर्थस्य विवक्षणेनादोषात् । अत एवैतत्फलतया पक्वस्तण्डुलः इत्यादौ फलस्य प्राधान्येऽपि चैत्रादेः कर्तृत्वसिद्धिरिति कृदन्तस्थलप्रदर्शनं शेखरादौ स्वरसतः सङ्गच्छते । अन्यथा पच्यत इत्याख्यातस्थलमेव प्रदर्शयेत्। अतः कर्तृप्रत्ययसमभिव्याहार इत्यस्य तृजादिप्रत्ययसमभिव्याहार इत्येवार्थः स्वीकार्यः । एवञ्च धात्वर्थव्यापाराश्रयत्वस्य ' निवृत्तिप्रेषणं कर्मेति पक्षे कर्मकर्तर्यव्याप्ततया प्रधानीभूतधात्वर्थाश्रयत्वं स्वातन्त्र्यं, तद्वत्वं कर्तृत्वमिति।

भूषणकारस्तु अध्यारोपपक्षाश्रयणेन स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्व-मित्युररीचकार ।

५१. दीक्षिताशयः

भट्टोजीदीक्षितः स्वतन्त्रः कर्ता (१-४-५४) इति सूत्रव्याख्यानसन्दर्भे मनोरमायामेवमवोचत्- प्राधानीभूतधात्वर्थं प्रति आश्रयत्वम् । आह च -

धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते इति ।

दीक्षितस्यायमाशयो भवितुमर्हति यत् प्राधानधात्वर्थाश्रयत्वं स्वातन्त्र्यम्, तद्वत्त्वं कर्तृत्वमिति । छात्रो गच्छतीत्यत्र संयोगानुकूलव्यापारो धात्वर्थः, तत्र प्रधानं = व्यापारः , तदाश्रयत्वेन छात्रस्य कर्तृसंज्ञा सिध्यति । पच्यते ओदनः स्वयमेवेति कर्मकर्तृस्थले निवृत्तप्रेषणवादी अयम्, अतः कर्मकर्तरि व्यापारस्य त्यागादवशिष्टं फलं भवति, तदाश्रयत्वेन ओदनस्य कर्तृसंज्ञा सिध्यति । धातुनोक्तक्रिय इत्यत्र क्रियापदं प्रधानार्थपरम्, उक्ता क्रिया (प्रधानार्थः) यस्मिन् तत्। प्रधानधात्वर्थाश्रय इत्यर्थः ।

५२. भूषणकाराशयः

वैयाकरणभूषणसारे सुबर्थवादे कौण्डभट्टः एवमवोचत- कर्तृतृतीयाया आश्रयोऽर्थः । तथा हि - स्वतन्त्रः कर्ता (१-४-५४)। स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्वम् । धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते इति। भूषणकारस्यायमभिप्रायो भवितुमर्हति यत् - 'चैत्र; पचति, घटो भवति 'इत्यादौ चैत्र-घटादौ पाक-भवनादि रूपधात्वर्थव्यापाराश्रयत्वाल्लक्षण-समन्वयः । कर्मकर्तृस्थलेऽध्यारोपितप्रेषणवादी अयम्, अतः कर्मकर्तरि पच्यते ओदनः स्वयमेवेत्यादि स्थलेषु व्यापारो विद्यते , तदाश्रयत्वेन तण्डुलानां कर्तृत्वं सिध्यति ।

५३. अयमत्र निष्कर्षः

कर्तृलक्षणे दीक्षितकौण्डभट्टयोः मतभेदो विद्यते । दीक्षितो हि निवृत्तप्रेषणवादी भवति । कर्मकर्तरि व्यापारस्य त्यागात्तत्र कर्तृत्वसिद्ध्यर्थं प्राधानधात्वर्थाश्रयत्वं स्वातन्त्र्यम्, तद्वत्त्वं कर्तृत्वमित्यवोचत्। अध्यारोपितप्रेषणवादी भवति भूषणकारः । कर्मकर्तरि व्यापारो विद्यते । अतो धात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यं, तद्वत्त्वं कर्तृत्वमित्यभणत् । उभयं-मेलयित्वा' प्रधानधात्वर्थव्यापाराश्रयत्वं कर्तृत्व' मिति कथनं न युज्यते।

यत्तु कर्मसंज्ञासूत्रे 'स्वतन्त्र' इति कैयटप्रतीके स्वातन्त्र्येण विवक्षित इत्यर्थः, तच्चारोपित,मनारोपितं वेत्यन्यदेतत्। कर्तृप्रत्ययसमभिव्याहारे

प्रधानीभूतधात्वर्थव्यापाराश्रयो हि सः' इत्युद्द्योते नागेशोक्तिरसङ्गता स्यात्। तथा 'प्रधानधात्वर्थव्यापाराश्रयत्वमिति सुबर्थवादमञ्जूषायां परेतुकल्पे नागेशोक्तिरसङ्गतैव स्यादिति चेत् -

अत्र गुरुचरणाः - लिखितपुस्तके तत्र व्यापारपदरहित एव पाठः। व्यापारपदसहितपाठस्तु लेखकप्रमादात्। युक्तं चैतत्। न हि तौ ग्रन्थभागौ नागेशसिद्धान्तप्रतिपादकौ, किन्तु दीक्षिताशयानुवादभूतौ। दीक्षितो हि कर्तृसंज्ञासूत्रे कौस्तुभेऽन्यत्र च स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्वम्। प्राधानधात्वर्थाश्रयत्वं स्वातन्त्र्यम्, इति पृथगेव लक्षणे प्रतिपादयामास, न तु क्वापि प्रधानधात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति प्रोवाच। तथा हि सति प्रधान-व्यापारपदयोरन्यतरस्य वैयर्थ्यं स्पष्टमेव। एवं पृथग्लक्षणयोर्जाग्रतोरन्यतरस्य निरर्थकत्वसूचकं सङ्कीर्णं लक्षणं नागेशः कथं वा प्रतिपादयति। अतिजागरूको हि नागेशः इति। स्पष्टञ्चेदं सुबर्थवादे तत्त्वदर्शिन्याम्।

भूषणकारोक्तं लक्षणम्' स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्वम् 'इति। अत्र व्यापारपदेन प्रधानव्यापारस्यैव ग्रहणे प्रमाणाभावात्फलाभावाच्च व्यापारमात्रस्य ग्रहणम्। तेन चैत्र स्तण्डुलं पचति, चैत्रेण तण्डुलः पच्यते, चैत्रो मैत्रेण पाचयति इत्यादौ प्रधानव्यापाराश्रयस्य, पक्व स्तण्डुल श्चैत्रेणेत्यादौ धात्वर्थफलविशेषणव्यापाराश्रयस्य, तण्डुलस्य पाचक श्चैत्रः इत्यादौ कृदर्थविशेषणव्यापाराश्रयस्य, चैत्रः पचति भवति, पश्य मृगो धावतीत्यादौ धात्वन्तरार्थविशेषणव्यापाराश्रयस्य च निरुक्तस्वातन्त्र्यसत्वेन कर्तृत्वं सिद्ध्यति। तण्डुलः पच्यते स्वयमेवेति कर्मकर्तर्यपीदं स्वातन्त्र्यम्। पचादावौत्सर्गिकस्य फलव्यापारयो र्वैयधिकरण्यमात्रस्य परं त्यागः। विशकलितपक्षे विशिष्टशक्तिपक्षे चेदं तुल्यम्। एवं च पचादेः फलसमानाधिकरण-व्यापारार्थकतया तादृशव्यापाराश्रयतया कर्मकर्तरि तण्डुलादेः स्वातन्त्र्यं निष्प्रत्यूहम्।

कर्मवत्कर्मणा तुल्यक्रियः(३-१-८७) इति सूत्रे भाष्ये एवं विचारः प्रस्तुतः - कर्मकर्तरि कर्तृत्वं स्वातन्त्र्यस्य विवक्षितत्वात् (वा), कर्मकर्तरि कर्तृत्वमस्ति। कुतः? स्वातन्त्र्यस्य विवक्षितत्वात्। स्वातन्त्र्येणैवाऽत्र कर्ता विवक्षितः। किं पुनः सतः स्वातन्त्र्यस्य विवक्षा, आहोस्विद्विवक्षामात्रम्? सत इत्याह । कथं ज्ञायते? इह भिद्यते कुसूलेनेति, न चान्यः कर्ता दृश्यते क्रिया चोपलभ्यते। किं च भोः विग्रहवतैव क्रियायाः कर्त्रा भवितव्यं, न पुनर्वातातपकाला अपि कर्तारः स्युः। भवेत्सिद्धं यदि वातातपकालानामन्यतमः कर्ता स्यात्। यस्तु खलु निवाते निरभिवर्षेऽचिरकालकृतः कुसूलः स्वयमेव भिद्यते तस्य नान्यः कर्ता भवत्यन्यदतः कुसूलात्।

तद्भाष्यव्याख्यानसन्दर्भे स्वातन्त्र्यस्येति प्रतीकमादाय पच्यते ओदनः स्वयमेवेति विक्लित्तिमात्रवाची पचिः। तत्र चौदनस्य कर्तृत्वमेव इति कैयटः।

तत्रैव उद्द्योतव्याख्याने कर्मकर्तरीति प्रतीकमादाय स्वातन्त्र्यञ्च प्राधानधात्वर्थाश्रयत्वम् इति नागेशभट्टः। अनेन निवृत्तप्रेषणपक्षः भाष्यसम्मत इति प्रतिभाति। अस्मिन् पक्षे धातुत्वन्तु भूतपूर्वभावनार्थत्वादिति कौस्तुभे उक्तम्।

५४. मञ्जूषाकाराशयः

मञ्जूषायां सुबर्थवादे परेतुकल्पे १ तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं स्वातन्त्र्यम् । एवं २ स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि सूत्रे स्वातन्त्र्यमित्युक्तम्। प्रथमलक्षणस्य 'कारके' इति सूत्रस्थं भाष्यं प्रमाणम् -तत्र हि प्रधानेन समवाये स्थाली परतन्त्रा, व्यवाये स्वतन्त्रा, किं पुनः प्रधानं, कर्ता, कथं ज्ञायते - कर्ता प्रधानमिति , यत्सर्वेषु कारकेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति इति ।

द्वितीयलक्षणस्य स्वतन्त्रः कर्ता(१-४-५४) इति सूत्रभाष्यं प्रमाणम्- तत्र हि - कुर्वन्स्वतन्त्रोऽकुर्वन्नेति । साधीयो ज्ञापकम्भवति । प्रेषिते च

किलायं क्रियां चाऽक्रियां च दृष्ट्वाऽध्यवस्यति कुर्वन्स्वतन्त्रोऽकुर्वन्नेति । यदि च प्रेषितोऽसौ न करोति स्वतन्त्रोऽसौ भवतीति ।

यदि प्रयोज्यः परतन्त्रः स्यात्सर्वथा कुर्यादेव, कदाचि न्न करोत्यपि, तस्मात्स्वतन्त्र इति भावः । एवं निरुक्तलक्षणं सिद्धम् । तस्यैव च प्रागुक्तं सकलकारकप्रयोक्तृत्वम् । तच्चारोपितमनारोपितं च संज्ञोपयोगि । तत्रारोपितं स्थाली पचति इत्यत्र, अनारोपितं 'चैत्रः पचति' इत्यत्र । यस्य च स्वातन्त्र्यविवक्षा तद्व्यापार एव च धातुना प्राधान्येनोच्यते, शब्दशक्तिस्वभावात्। तथा च निरुक्ते द्वे लक्षणे स्वतन्त्रः कर्तेति सूत्राक्षरमर्यादया नैव लभ्यते ।

अत्रायं विशेषः - कर्मत्वं कर्तुरीप्सिततमं कर्मेति सूत्रेण शब्दशक्त्या लभ्यते । निरुपयिष्यते चाग्रे। क्रियाजनकत्वरूपं कारकत्वं फलस्याप्यस्तीति सुबर्थवादे द्वितीयाप्रकरणे एवं प्रत्यपादयत् नागेशः - फलस्यापि क्रियाजनकत्वं, तज्ज्ञानपूर्वकं क्रियोत्पादनात् इति। अतो युज्यते धात्वर्थफलस्य कर्मत्वं व्यपदेशिवद्भावेन। तथा शब्दशक्त्या कर्तृत्वस्यालाभात्, व्यापारस्य व्यपदेशिवद्भावेन व्यापाराश्रयत्वसम्पादनेऽपि तस्य क्रिया-जनकत्वरूपकारकत्वासम्भवेन च कर्तृत्वं दुरुपपादमेव । अत एव शास्त्रे यथा धात्वर्थफलस्य कर्मत्वं प्रतिपादितं, तथा धात्वर्थव्यापारस्य कर्तृत्वं क्वापि न प्रतिपादितम् । विक्लित्त्यादि फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वम् । अत एव तत्समानाधिकरणे स्तोकं पचतीत्यादौ कर्मत्वम् ।

उक्तञ्च कृदर्थवादे मञ्जूषायाम् - व्यापारान्वये तु शोभनः पाक इत्येव । तस्य कर्मत्वाभावेन तद्विशेषणे द्वितीयायाः अप्राप्तेः । तिङन्तार्थव्यापारान्वये तु नपुंसकतैवेति । तत्र प्रातिपदिकार्थे प्रथमैवेति मञ्जूषाकाराणामाशयः ।

५५. कर्मस्वरूपनिर्णयः

कर्तुरीप्सिततमं कर्म(१-४-४९) इति सूत्रेण कर्मलक्षणं प्रतिपादितम्।

सूत्रे कर्तुरित्यत्र क्तस्य च वर्तमाने (२-३-६७) इति कर्तरि षष्ठी । ईप्सिततममित्यत्र आप्लृ धातोः सन्नन्तात् कर्मणि मतिबुद्धिपूजार्थेभ्यश्च(३-२-१८८) इति वर्तमाने क्तः ततस्तमप् । मतिबुद्धीत्यादिसूत्रे मतिशब्दः इच्छापरः, पुनर्बुद्धिग्रहणात् । क्तप्रत्ययेनोपस्थितं वर्तमानत्वं नेह विवक्षितम्, तेन कटं कृतवान्, कटं करिष्यतीत्यादि सिद्ध्यति । अत्राप्नोतेः सम्बन्धमात्रमर्थः । न तु व्याप्तिरेव । सा हि अवच्छेदकावच्छेदेन सम्बन्धः, सेनया ग्रामो व्याप्त इत्यादौ तथा प्रतीतेः । तथा चेप्सिततममित्यस्य सम्बद्धमित्यर्थः, सनस्तमपश्चार्थोऽविवक्षित एव । आप्नोत्यर्थस्य करणाकाङ्क्षायां सूत्रोपात्तकर्तृपदार्थविशेषणीभूतव्यापारः करणतयाऽन्वेति। सम्बन्धश्चात्र जन्यतारूपः जन्याश्रयतारूपश्च । एवञ्च कर्त्रा स्वनिष्ठव्यापारेण जन्यत्वजन्याश्रयत्वान्यतरसम्बन्धेन सम्बद्धं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थो लभ्यते । तेन कर्तृनिष्ठव्यापारजन्यस्य विक्लित्त्यादिफलस्य, तादृशव्यापारजन्यविक्लित्त्याश्रयतण्डुलादेश्च कर्मत्वं सिद्ध्यति ।

न च महता प्रयासेन फलस्य कर्मत्वसम्पादनं वृथा, फलाभावात्, तद्वाचकस्य धातोरप्रातिपदिकत्वेन ततो द्वितीयादेरप्राप्तेरिति वाच्यम् । धात्वर्थफलस्य कर्मत्वे तत्समानाधिकरणस्य स्तोकादेरपि कर्मत्वात् 'स्तोकं पचतीत्यादौ स्तोकादे र्द्वितीयाप्रवृत्तेः फलस्य सुवचत्वात् । एवञ्च धात्वर्थफलस्य कर्मत्वं निरुक्तरीत्या 'कर्तुरीप्सिततमं कर्मेति' पाणिनिसूत्राक्षरैः शब्दशक्त्या लभ्यत एव । अत एव पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः (८-१-६७) इति सूत्रे भाष्ये पूजनात्पूजिते मलोपश्च वक्तव्यः। दारुणाध्यापकः दारुणाभिरूपः इत्युक्तम् । क्रियाविशेषणं दारुणशब्दो द्वितीयान्तः । वैयधिकरण्यात्समासाभावान्मलोपो विधीयते' इति कैयटः। दारुणं यदध्यापनं तत्कर्तेत्यर्थः। वृत्तौ दारुणादयः पूजार्थकाः। एवञ्च दारुणपदार्थस्य द्रव्यवाचिना सामानाधिकरण्याभावाद्विशेषण्समासाप्रवृत्त्या 'स्तोकं पाकः' इतिवद् दारुणमध्यापक इति प्राप्ते दारुणाध्यापक इत्यस्य सिद्धये

मलोपवचनमारब्धम् । अनेन भाष्येण क्रियाविशेषणानां समासाभावोऽपि बोध्यते ।

इदमत्रावधेयम् - फलस्य कर्मत्वप्रतिपादनं सकर्मकधातुस्थल एव। तत्रैव तत्सम्भवात् । फले व्यापारे वैयधिकरण्यस्य तत्रैव सम्भवाच्च। अकर्मकधातुस्थले फलस्य कर्मत्वासम्भवात् तद्विशेषणे प्रथमैव, न द्वितीया। सकर्मके तु फलस्य कर्मत्वात्तद्विशेषणाद् द्वितीया भवति । व्यापारविशेषणात्तु प्रथमैव । यथा तृप्तिकामः स्तोकेनौदनं पचतीत्यत्र स्तोकस्य विक्लित्तावन्वयः। विक्लित्तेश्च पाकक्रियायां (ओदनकर्मकोत्पत्त्यनुकूलक्रियायाम्) करणत्वेन, तत्समानाधिकरणत्वात् स्तोकपदात् तृतीयैव। तृप्तिविषयकामनावत्कर्तृकः स्तोकविक्लित्तिकरणक ओदनकर्मकः पाकः इति बोधः।

५६. काशिका-पदमञ्जरीकारयोराशयः

जयादित्य-हरदतौ हि सकर्मकाकर्मकधातुविभागमन्तरा धातुसामान्ये क्रियाविशेषणानां कर्मत्वेन द्वितीयान्तत्वमङ्गीकुर्वाते । तथा हि - तत्प्रत्यनुपूर्वमीपलोमकूलम्(४-४-२८) इति सूत्रे वृत्तिकार एवमाह- तदिति द्वितीया समर्थविभक्तिः । द्वितीया समर्थेभ्यो वर्तत इत्यर्थे ठक् प्रत्ययो भवति । ननु च वृत्तिरकर्मकः, कथं तस्य कर्मणा सम्बन्धः ? क्रियाविशेषणमकर्मकाणामपि कर्म भवतीति । अत्र हरदत्तः - क्रियाविशेषणमित्यादि आख्यातं हि धात्वर्थस्य कर्तव्यतामाचष्टे । वर्तते = वर्तनं करोति । सुप्यते = स्वापः क्रियते । शोभनमोदनः पच्यते = ओदनकर्मकः पाकः शोभनः क्रियते । पचि धात्वर्थः कर्तव्य एव सम्बध्यमानः कर्मसम्बध्यमानः सम्पद्यते । तस्य यत्समानाधिकरणं विशेषणं तदपि कर्मैव भवतीति ।

५७. कौमुदीकाराशयः

सकर्मकधातुस्थले फलेऽन्वये क्रियाविशेषणानां कर्मत्वाद्द्वितीया, यथा- आदिं पचति । तत्रैव व्यापारान्वये तद्विशेषणानां कर्मत्वाभावान्न द्वितीया, किन्तु प्रथमैव यथा - आदिः पचति । अकर्मकधातुस्थले तु

फलस्याकर्मकतया तद्विशेषणानामप्यकर्मकतया न द्वितीया, किन्तु प्रथमैवेति। धात्वर्थस्य करणत्वेन विवक्षायां तु तद्विशेषणेभ्यः सर्वेषामपि मते तृतीयैव।

ननु द्वितीयान्तादस्माद्वर्तत इत्यस्मिन्नर्थे ठक् स्यात् । क्रियाविशेषणत्वाद्द्वितीयेति तत्प्रत्यनुपूर्वमीपलोमकूलम् (४-४-२८) इति सूत्रस्थ कौमुदीग्रन्थात् 'हतशायिकाः शय्यन्ते' यादृशानि हतानां शयनानि तत्सदृशानि देवदत्तादिभिः क्रियन्त इत्यर्थः । शायिका इति क्रियाविशेषणत्वाद् द्वितीयाबहुवचनान्तमिति यग्विधायकसूत्रस्थ कौस्तुभमनोरमाग्रन्थ-स्वारस्याच्चाऽकर्मकधातुस्थलेऽपि क्रियाविशेषणानां द्वितीयान्तत्वं लभ्यत एवेति चेद् -

उच्यते । तद्ग्रन्थानां वृत्तिपदमञ्जरीग्रन्थानुरोधितया तेषां निरुक्तार्थे प्रमाणाभावात् । अत एव शब्देन्दुशेखरकार एतत्सूत्रे क्रियाविशेषणत्वाद् द्वितीयेति कौमुदीप्रतीकमुपादाय 'अकर्मकधातुस्थलेऽपि फलव्यापारयोः धात्वर्थत्वेन फलसामानाधिकरण्याद् द्वितीयेति भावः । 'क्रियाविशेषणत्वा न्नपुंसकत्वं प्रथमान्तत्वं च युक्तम्' इत्यलिखत् । अकर्मकस्थलेऽपि क्रियाविशेषणानां कर्मत्वमिति वृत्तिकाराशयप्रदर्शनपरः' इति भावः। इत्यन्तः शेखरग्रन्थः। फलेन = व्यापारसमानाधिकरणेन करोतिक्रियानिरूपितकर्मत्ववता वर्त्तनरुपेण (धात्वर्थेन) सामानाधिकरण्यात् , द्वितीया = प्रतीपादेरपि कर्मत्वाद् द्वितीयेति शेखरकाराशयः ।

५८. मञ्जूषाकाराशयः

कर्तुरीप्सिततमं कर्म (१-४-४९) इति सूत्रबोधितं कर्मत्वं कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यव्यापारव्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वम्। तण्डुलं पचतीत्यादौ विक्लित्त्याश्रयत्वात् कर्मत्वं, विक्लित्तिरूपफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात् तत्त्वम् । अत एव तत्समानाधिकरणे स्तोकं पचतीत्यादौ कर्मत्वमिति। व्यापारे प्रकृतधात्वर्थत्वं, फले व्यापारप्रयोज्यत्वं च तमपा लभ्यते , फले प्रकृतधात्वर्थत्वं, व्यापारे

प्राधान्यञ्च विवक्ष्यते । एवञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यव्यापार-व्यधिकरणप्रकृतधात्वर्थफलाश्रयत्वेन कर्तुरुद्देश्यत्वं कर्मत्वमिति फलति । चैत्रस्तण्डुलं पचतीत्यत्र समन्वयः । कर्ता = चैत्रः, तन्निष्ठो यः प्रकृतधात्वर्थव्यापारः = फूत्कारादिव्यापारः, तत्प्रयोज्यं तद्व्यधिकरणं च यत् फलं = विक्लित्तिः, तदाश्रयः = तण्डुलः, तत्र कर्तुरुद्देश्यत्वस्यापि सत्त्वात् तण्डुलस्य कर्मत्वाद् द्वितीया सिद्ध्यति ।

व्यापारे प्राधान्यनिवेशस्य प्रयोजनम्- अग्ने र्माणवकं वारयतीत्यत्र माणवकस्य कर्मत्वेन द्वितीया सिद्धिः। तथा हि - वारयतेः संयोगानुकूलव्यापाराभावानुकूलव्यापारोऽर्थः । तत्र संयोगानुकूलो माणवकनिष्ठो व्यापारोऽप्रधानम्, संयोगानुकूलव्यापाराभावानुकूलश्चैत्रादिनिष्ठो व्यापारः प्रधानम् । चैत्रनिष्ठ प्रधानव्यापारप्रयोज्यफलाश्रयत्वाभावान्नाग्नेः कर्मत्त्वम्। प्रधानव्यापारप्रयोज्यसंयोगानुकूलव्यापाराभावरूपफलाश्रयत्वेन माणवकस्य कर्मत्वं सिद्ध्यति । अन्यथा वारयतिभिन्ने पच्यादौ कर्मत्वस्य चरितार्थतया वारणार्थानामित्यस्य वारयतिमात्रविषयकतया निरवकाशत्वेन अपवादत्वात् माणवकस्यापादानत्वापत्तिः । तथा सति माणवकशब्दादपि पञ्चमी स्यात्। व्यापारे प्राधान्यनिवेशे तु प्रधानीभूतव्यापारजन्यफलाश्रये कर्मसंज्ञा, अप्रधानीभूतव्यापारजन्यफलाश्रयेऽपादानसंज्ञेति विषयभेदाद् वारणर्थानामित्यस्य न कर्मसंज्ञाबाधकत्वम् ।

फले व्यापारप्रयोज्यत्वनिवेशस्य प्रयोजनम् - अजां ग्रामं नयति। संयोगानुकूलव्यापारानुकूलव्यापारो नयतेरर्थः। अत्र संयोगे प्रधानीभूतव्यापारजन्यत्वाभावेऽपि ,तत्प्रयोज्यत्वस्य सत्त्वा त्तदाश्रयस्यापि ग्रामस्य कर्मत्वं सिद्ध्यति ।

फले प्रकृतधात्वर्थेति निवेशस्य प्रयोजनम् - माषेषु प्रसक्तमश्वं माषनाशो माभूदित्यन्यत्र बध्नातीत्यर्थके 'माषेष्वश्वं बध्नातीति वाक्ये कर्मणा ईप्सिता माषा न कर्तुरिति कर्तृग्रहणेन माषाणां कर्मत्ववारणेऽपि पुष्ट्यर्थं

माषभक्षणाय माषक्षेत्रेऽश्वं बध्नातीत्यर्थके तत्प्रयोगे माषाणां तत्त्वापत्तिः, कर्तृनिष्ठबन्धनक्रियाजन्यभक्षणरूप- फलाश्रयात्। फले प्रकृतधात्वर्थेति निवेशेन बध्नातेः अस्वातन्त्र्यसम्पादको रज्ज्वादिसंयोजनपरो व्यापारः। तत्प्रयोज्यं यद्भक्षणं = माषभक्षणं, तद्रूपफलाश्रयाणां माषाणां न कर्मत्वम्। प्रकृते भक्षणं न बध्नात्यर्थः, किन्तु अस्वातन्त्र्यमेव। अतोऽत्र तदर्थके माषाणां न कर्मत्वम्।

५९. कर्तृकर्मणोः तिङर्थत्वप्रतिपादनम्

कर्तृकर्मणोः तिङर्थत्वे पाणिनीयं 'लः कर्मणि च भावे चाकर्मकेभ्यः (३-४-६९) इति सूत्रं प्रमाणं भवति। अत्र हि 'कर्तरि कृत्' (३-४-६७) इति सूत्रात् कर्तरीत्यनुवर्तते। सूत्रमिदं वाक्यद्वयात्मकम्। 'लः कर्मणि च' इत्येकम् , 'भावे चाकर्मकेभ्यः' इत्यपरम्, द्विचकारदर्शनात्। उभयत्रापि कर्तरीति सम्बध्यते। लः इति ल्शब्दस्य प्रथमाबहुवचनम्। एवञ्च लकाराः कर्मणि कर्तरि च भवन्ति इति प्रथमवाक्यस्यार्थः। अकर्मकेभ्यो लकाराः भावे कर्तरि च भवन्तीति द्वितीयवाक्यस्यार्थः। द्वितीयवाक्यमकर्मकविषयमिति निश्चयेन परिशेषन्यायात् प्रथमवाक्यं सकर्मकविषयमिति निश्चयप्रचम्। अत एव कौमुदीकारः सूत्रार्थमेवं लिलेख - लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च भवन्ति, अकर्मकेभ्यो भावे कर्तरि च भवन्तीति। तिङ्षु विद्यमानां शक्तिं लकारेष्वारोप्य तदर्थकत्वं लकारस्य प्रतिपादितम्। तिङर्थकर्तुः धात्वर्थव्यापारेऽन्वयः। तिङर्थकर्मणः धात्वर्थफलेऽन्वयः। तथा चैवं कार्यकारणभावौ फलतः - तिङर्थकर्तृप्रकारकबोधं प्रति विशेष्यतया धात्वर्थव्यापारोपस्थितिः हेतुः। तिङर्थकर्मप्रकारकबोधं प्रति विशेष्यतया धात्वर्थफलोपस्थितिः हेतुरिति।

एवं सप्रमाणं कर्तृकर्मणोः तिङर्थत्वे सिद्धे 'लक्षणया, आक्षेपात्, प्रथमान्तपदादिति त्रिभिरुपायैः कर्तृकर्मप्रतीतेः सम्भवात् किमर्थं तत्र तिङः शक्तिरिति दर्शनान्तरीयाणां वादोऽयुक्तः। लः कर्मणीति मुनिवचनस्य विद्यमानत्वात्।

६०. भाष्यप्रामाण्यम्

१. बहुषु बहुवचनम् (१-४-२१) इति सूत्रे भाष्ये - सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्। सुपां संख्या चैवार्थः कर्मादयश्च। तथा तिङाम् (संख्या चैवार्थः कर्मादयश्च) इत्युक्तम्।

२. सह युक्तेऽप्रधाने (२-३-१९) इति सूत्रेऽपि भाष्ये 'प्रधाने कर्तरि लादयो भवन्तीति' अभणत्।

३. सार्वधातुके यक् (३-१-६७) इति सूत्रे भाष्यकार एवमाह - कर्तृवाचिनि सार्वधातुके शब्भविष्यतीति।

४. गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यात् (८-१-५१) इति सूत्रे भाष्ये - सिद्धं तु तिङोरेकद्रव्याभिधानात् (वा) सिद्धमेतत्। कथम्? तिङोरेकद्रव्याभिधानात्। यत्र तिङ्भ्यामेकं द्रव्यमभिधीयते तत्रेति वक्तव्यम्' इत्युक्तम्।

६१. संख्यायाः अन्वयः

आख्यातार्थसंख्यायाः आख्यातार्थकर्तृकर्मणोरेवान्वयः। धात्वर्थापेक्षया प्रत्यासत्त्यतिशयसत्त्वात् प्रत्ययार्थधर्मिण्येव प्रत्ययार्थसंख्यायाः अन्वयो युक्तः, समानप्रत्ययोपात्तत्वात्। अत्र 'अनभिहिते'(२-३-१) इति सूत्रस्थं भाष्यमपि प्रमाणं भवति। तथा हि - प्रातिपदिकार्थसूत्रेऽनुवृत्तमनभिहित इति अन्यस्यासम्भवात् संख्याया एव विशेषणं स्यात्। तथा च'पचति देवदत्तः' इत्यत्र तिङा संख्याभिधानात् प्रथमा न स्याद् 'इत्यापादितं भाष्ये। पचतीति कर्तुरेकत्वंतिङाभिहितमिति कैयटः। इत्थं च कार्यकारणभावः - समवाय-सम्बन्धेनाख्यातार्थसंख्याप्रकारकबोधं प्रति तज्जन्यकर्तृविषयकोपस्थितिः कारणम् / तज्जन्यकर्मोपस्थितिः कारणम्। एवञ्चाख्यातार्थसंख्याप्रकारकबोधे तिङर्थाश्रयोपस्थितिः कारणमित्येक एव कार्यकारणभावः।

६२. नैयायिकमते संख्याया अन्वयः

न्यायमते आख्यातार्थसंख्यायाः प्रथमान्तार्थेऽन्वयः। स च चैत्र स्तण्डुलं पचतीति कर्त्राख्याते चैत्रः, चैत्रेण तण्डुलः पच्यते' इति कर्माख्याते

तण्डुलश्च। कृतेराख्यातार्थत्वेन तत्र संख्यान्वयोऽसम्भवः। एवञ्चाख्यातार्थसंख्याप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः हेतुरिति कार्यकारणभावः फलितः। यत्र तु द्वे प्रथमान्तपदे तत्रातिव्याप्तिः, यथा - 'चन्द्र इव मुखं दृश्यते' 'देवदत्तो भुक्त्वा व्रजति' इति। अत्र प्रथमवाक्ये चन्द्रः इव इति, द्वितीयवाक्ये 'देवदत्तः, भुक्त्वा इति। इव इति निपातात्, भुक्त्वा इति क्त्वान्ताव्ययाच्च प्रथमैकवचने भवतः, तयोः 'अव्ययादाप्सुपः' (२-४-८२) इत्यनेन लुक्, प्रत्ययलक्षणेन प्रथमान्तत्वं विद्यते। अतस्तयोः संख्यायामन्वयव्यावृत्त्यर्थमितराविशेषणत्वमिति विशेषणं प्रथमान्तार्थे निवेशनीयम्। तथा चाख्यातार्थसंख्या प्रकारकबोधं प्रति अन्याविशेषणीभूतप्रथमान्तार्थोपस्थितिः हेतुरिति कार्यकारणभावः फलति। प्रकृते चन्द्र इव मुखं दृश्यते इत्यत्र इवार्थसादृश्ये चन्द्रस्य प्रतियोगिताकत्वसंसर्गेणान्वयान्न चन्द्रे संख्यान्वयः। एवमेव 'देवदत्तो भुक्त्वा व्रजति' इत्यत्र क्त्वाप्रत्ययार्थस्य व्रजनक्रियायामुत्तरकालिकत्वसंसर्गेण च विशेषणतयाऽन्वयात् इतराविशेषणत्वाभावात् संख्यायाः न तत्रान्वयः। प्रथमान्तपदजन्योपस्थितिः कारणमिति कथनात् 'चैत्रेण सुप्यते' इति भावाख्याते धात्वर्थस्य अन्याविशेषणत्वेऽपि प्रथमान्तत्वाभावात् न संख्यान्वयः। एवमेव 'स्तोकं पचति' इत्यादौ स्तोकादेः क्रियाविशेषणस्यान्याविशेषणत्वेऽपि प्रथमान्तत्वाभावाद्दोषाः वार्यन्ते इति।

६३. युक्तिप्रदर्शनम्

नैयायिकमते, वैयाकरणमते च एक एव कार्यकारणभावः, परन्तु नैयायिकोक्तकार्यकारणभावे अन्याविशेषणीभूत इति विशेषणदलनिवेशनप्रयुक्तं गौरवमतिरिच्यते। अनभिहित इति सूत्रभाष्यमपि संख्यायाः कर्तृकर्मणोरन्वयस्वीकारे प्रमाणं भवतीति पूर्वमेवोपपादितम्।

६४ कालस्वरूपनिर्णयः

हरिः कालसमुद्देशे कालस्वरूपविषये एवमाह -

व्यापारव्यतिरेकेण कालमेके प्रचक्षते।
नित्यमेकं विभुद्रव्यं परिमाणं क्रियावताम्।। (वा का १)

अस्या अर्थः - एके = काणादाः, व्यापारव्यतिरेकेणेत्यत्र वैशिष्ट्यार्थे 'प्रकृत्यादिभ्यः उपसंख्यानम्' इत्यनेन तृतीया । क्रियाव्यतिरिक्तं कालं प्रचक्षते। अकृतकत्वान्नित्यं,जन्यभावरूपादिभिः क्षणादिरूपेण भेदोऽपि वस्तुत एकम्, सर्वत्र जायमानानां भावनानां जनकत्वाज्जगदाश्रयत्वाच्च सर्वभूतसंयोगित्वेन विभुपरापरत्व- महत्त्वादि गुणाश्रयत्वेन द्रव्यम्, क्रियावताम् = जन्मादिक्रियावताम् भावानां जन्मादिक्रियापरिच्छेदद्वारेण, परिमाणम् = घटो जायते, घटोऽभूत्, घटो भविष्यति इत्यादिरूपैः परिच्छेदकम् । किञ्च कालो विभुत्वा, देकत्वाच्च न स्वेन विशुद्धेन रूपेण जन्मादिक्रियाणां तद्वताञ्च परिच्छेदकः । अपि तु तत्तत् क्रियोपहितेन रूपेण क्षण-घटिका-दिन-पक्ष-मासादिपदव्यपदेश्येन रूपेण । तद्यथा - विषयोपहितं ब्रह्मचैतन्यं तं विषयमवभासयति इति ,तद्वत् कालोऽपि तत्तत्क्रियोपहितः तां तां क्रियां परिच्छिनत्ति तत्तत्क्रियादिमद्भावोपहितश्च तत्तत्क्रियादिमद्भावं परिच्छिनत्ति। परिच्छेद्यानामुपाधित्वस्वीकाराच्च नात्माश्रयादिकं , विधेयानन्वयित्वात् ।

दिष्टिप्रस्थसुवर्णादि मूर्तिभेदाय कल्पते ।
क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका ।। (वा का २)

प्रमाणपरिमाणोन्मानेभ्यो व्यतिरिक्तः कालोऽमूर्तायाः क्रियायाः परिच्छेदहेतुः । सूर्यादिसञ्चारो हि स्वोपहितेन कालेन मीयते = परिच्छिद्यते मासः , संवत्सर इत्यादि । संख्या तु मूर्तामूर्तस्य सर्वस्य परिच्छेदमादधाति = करोति, प्रमाणादेश्च प्रागुक्तरूपस्य 'द्वौ घटौ' इति मूर्तस्य परिच्छेदे । 'बहवः आत्मानः , द्वे क्रिये ' इति अमूर्तयोः परिच्छेदे । 'एका वितस्तिः, द्वौ हस्तौ' इति प्रमाणयोः परिच्छेदे । 'चत्वारः प्रस्थाः' इति परिमाणस्य परिच्छेदे । 'पञ्च पलानि' (ऊर्ध्वमानं किलोन्मानं परिमाणन्तु सर्वतः) इत्युन्मानस्य परिच्छेदे उदाहरणानि । संख्यापि च संख्यया मीयते = परिच्छिद्यते 'द्वे विंशती ,पञ्च पञ्चाशतः' इति ।

जन्म-स्थिति-विनाशाः स्वस्मिन् समस्तक्रियाकलापान्तर्भावनहेतव

इति जन्मादिमतां पदार्थानां तद्द्वारेण निमित्तकारणं कालमेवाहुः ।

प्रत्यवस्थं तु कालस्य व्यापारोऽत्र व्यवस्थितः ।
काल एव हि विश्वात्मा व्यापार इति [illegible]ते।। (वा का ३)

अनुग्राहकत्वप्रतिबन्धकत्वादिभेदेन कालस्य व्यापारो नियतकालासु स्थिति-प्रसव-निरोधावस्थास्वविनाभावी इति विश्वस्य कालाधीनत्वाद् विश्वस्यात्मा = प्रयोजकत्वेन सूत्रस्थानीयो भावानां सकलचेष्टाहेतुत्वात् कार्यकारणयोरभेदोपचारेण व्यापार एवासौ कालो लोके व्यवह्रियते ।

एकोऽपि कालः भिन्नाभिः क्रियाभिरुपहितश्च सन् भिद्यमान एकादशभिः आकारैः विभक्ता भूत-भविष्य-द्वर्तमानताः प्राप्नोति । आह च हरिः -

क्रियोपाधिश्च सन् भूतभविष्यद्वर्तमानता ।
एकादशभिराकारैर्विभक्ताः प्रतिपद्यते ।। (वा का ३७)

भूतः पञ्चविधस्तत्र भविष्यंश्च चतुर्विधः।
वर्तमानो द्विधाख्यात इत्येकादशकल्पनाः ।। (वा का ३८)

तत्र भूत-भविष्यद्वर्तमानसंज्ञकेषु कालविभागेषु भूतः पञ्चविधः -

१. भूतसामान्यम् २. अद्यतनभूतः ३. अनद्यतनभूतः
४. अद्यतनानद्यतनसमूहः ५. भविष्यन्नपि अध्यारोपितभूतभावः (गौणः) आशंसायां भूतवच्च ।

भविष्यत्कालः चतुर्विधः-

१. भविष्यत्सामान्यम् २. अद्यतनभविष्यत् ३. अनद्यतनभविष्यत्
४. अद्यतनानद्यतनसमुदायरूपः

वर्तमानो द्विधा कथितः -

१. मुख्यो वर्तमानः २.अतिदिष्टवर्तमानः (वर्तमानसामीप्ये वर्तमानवद्वा)

एकस्य शक्तयस्तिस्रः कालस्य समवस्थिताः।
यत्संबन्धेन भावानां दर्शनादर्शने सताम्।। (वा का ४९)

परब्रह्मरूपस्यैकस्य कालस्य भूत-भविष्य-द्वर्तमानाख्यास्तिस्रः शक्तयः समवस्थिताः । 'पराऽस्य शक्तिर्विवधैव श्रूयते ' इति श्रुतिवचनम्। तत्र भूतभविष्यद्रूपकालशक्तिसंबन्धे भावानामदर्शनम् । वर्तमानाख्यकाल-शक्तिसंबन्धेन तु तेषां दर्शनम्।

६५. कालस्यान्वयः

तिङर्थकालस्य धात्वर्थव्यापारेऽन्वयः। 'वर्तमाने लट् (३-२-१२३) इत्यादिसूत्रेषु धातोरित्यधिक्रियते। धातोर्वर्तमानत्वं दुर्लभ, मतो धातुपदं तदर्थपरम्। धात्वर्थः फलं, व्यापारश्च, तयो र्मध्ये व्यापारस्य प्राधान्याद् वर्तमानादिकालानां तत्रान्वयो न्याय्यः। अमुमेवाशयं मनसि निधाय कौमुद्यां वर्तमाने लंडित्यस्य वर्तमानक्रियावृत्तेः धातो र्लट् स्यादित्युक्तम्।

अत्रेयं शङ्का -तिङ्प्रत्ययेन कर्तृकर्मसंख्याकालाः बोध्यन्ते। यथा संख्यायाः समानप्रत्ययोपात्तत्वात् कर्तृकर्मणोरन्वयः प्रतिपादित स्तथा कालस्यापि तेनैव हेतुना तत्रैवान्वयो युज्यत इति।

तत्रेदमुत्तरम्। यदि कालस्य कर्तृकर्मणोरन्वयः तदा कर्तुः वर्तमानत्वे लट् भवतीति लभ्यते। तथा सति फलानुकूलव्यापारसमाप्त्यनन्तरमपि कर्तुः वर्तमानत्वे पचतीति प्रयोगापत्तिः, 'अपाक्षीत्' इति भौतकालिकप्रयोगा-नापत्तिश्च। एवमेव क्वचित् कर्ता आगतः, व्यापारो नारब्धस्तदा पक्ष्यतीत्यनापत्तेः, पचतीत्यापत्तेश्च। अतः कालस्य धात्वर्थव्यापार एवान्वयो युक्तः।

६६. कालस्य फलेऽन्वयनिराकरणम्

यत्तु सिद्धान्तलेशसंग्रहे अप्पय्यदीक्षिताः - आख्यातार्थकालस्य धात्वर्थव्यापारेऽन्वये आमवातजडीकृतकलेवरे उत्थानानुकूलव्यापारवति उत्तिष्ठतीति प्रयोगापत्तिः, उत्थानानुकूलव्यापारस्य वर्तमानत्वात्। अतः कालस्य धात्वर्थफल एवान्वयः स्वीकार्यः इति।

अत्रोच्यते, परकीययत्नस्याप्रत्यक्षत्वात्तादृशप्रयोग एव न भवति।

किञ्चिच्चेष्टादिनाऽवगतौ च अयमुत्तिष्ठति शक्त्यभावात् फलं न जायते इति लोकप्रतीतेरिष्टत्वात्। कालस्य फलेऽन्वये फलस्य वर्तमानत्वे लट् इत्यर्थः फलति। क्वचित् फलं न निष्पन्नं, व्यापाराः विद्यन्ते, तदा पचतीत्यनापत्तेः, पक्ष्यतीत्यापत्तेश्च।

६७. पञ्चकं धात्वर्थ इति पक्षस्थापनम्

तिङां वाचकत्वे 'फलव्यापारौ धात्वर्थौ भवतः। कर्तृकर्मसंख्या-कालास्तिङर्थाः भवन्ति । प्रातिपदिकार्थवत् धात्वर्थविषयेऽपि प्रत्ययानां द्योतकतापक्षः भाष्ये स्वीकृतः। अत्र च प्रमाणं 'श्नुक्रमोरनात्मनेपदनिमित्ते'(७-२-६३) इति सूत्रभाष्यम्। तत्र हि - भावकर्मणोः इति आत्मनेपदविचारसन्दर्भे 'भावकर्मवृत्ताद्धातोः' इत्युक्तम् । अनेन स्पष्टं प्रतीयते कर्तृकर्मव्यर्थकत्वं धातोः। पञ्चकं प्रातिपदिकार्थ इतिवत् सर्वार्थकत्वं धातोः। तेन प्रत्ययाः द्योतकाः इति लभ्यते। लः कर्मणीत्यादिसूत्रस्यापि कर्मादिवृत्ताद्धातोः लो भवतीत्येवार्थः। वर्तमाने लट् (३-२-१२३) इत्यत्रापि वर्त्तमानक्रियार्थवृत्ते र्धातो र्लट् भवतीत्यर्थः प्रत्ययानां द्योतकतापक्षाभिप्रायेणैव प्रणीतः ।

६८. संख्यान्वये नवीनानामाशयः

ननु संख्यायाः कर्तृकर्मणोरन्वयः कथं सङ्गच्छते । कर्तृकर्मणोः संख्यायाश्च द्योत्यार्थत्वेन, द्योत्यार्थस्य द्योत्यार्थेऽन्वयो न घटत इति चेद्-

उच्यते, कालस्येव संख्याया अपि क्रियायामेवान्वयः । आख्यातार्थसंख्याप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति धात्वर्थभावनोपस्थिति र्विशेष्यतया हेतुः । संख्यायाः सत्त्वभूतत्वात् , क्रियाया असत्त्वभूतत्वाच्च न साक्षात् संख्यायाः क्रियायामन्वयः । किन्तु परम्परासम्बन्धेन, यथा पचतीत्यादि कर्त्राख्यातस्थले आख्यातार्थसंख्यायाः स्वाश्रयसमवेतत्वसम्बन्धेन क्रियायामन्वयः । पच्यते तण्डुल श्चैत्रेणेत्यादिकर्माख्यातस्थले स्वाश्रयभूतकर्म-वृत्तिफलप्रयोजकत्वसम्बन्धेन संख्यायाः धात्वर्थक्रियायामन्वयः । एताभ्यां

सम्बन्धाभ्यां संख्यायाः आख्यातार्थकृतावन्वय इति श्रीमान् खण्डदेवः भाट्टरहस्ये अगादीत् । तमेव पन्थानमाश्रितवान् नागेशभट्टोऽपि । कृतेराख्यातार्थत्वधात्वर्थत्वविषये तु भेदोऽस्त्येव ।

६९. कारकयोः भेदप्रदर्शनम्

सुबर्थस्थले बोध्यमानाः कर्मादयः शक्तिपराः । अत एव भट्टोजीदीक्षितः एवमाह-

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ' । इति ।

कौमुद्यामपि 'सप्तमीपञ्चम्यौ कारकमध्ये (२-३-७) इति सूत्रार्थविवरणवेलायां शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः । अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भोक्ता । कर्तृशक्त्योर्मध्ये ऽयं कालः इत्यवोचत् । बहुषु बहुवचनम् (१-४-२१) इति सूत्रभाष्ये उद्द्योतव्याख्याने नागेशभट्टः एवमगदीत् - कर्मादयः शब्दाः सुब्नियामकेषु शक्तिपराः , तिङ्सम्बन्धिशास्त्रेषु शक्तिमत्पराः । अत एव तिङ्द्योत्यानां प्रकृत्यर्थविशेषणता। नहि शक्तिः साक्षात्क्रियागता । एवञ्च सुपां तिङां च द्योतकतेत्येव भाष्यसम्मतम् । इति ।

ननु लकाराणां द्योतकत्वे लस्य स्थाने एव ' लटः शतृशानचावप्रथमासमानाधिकरणे (३-२-१२४) इत्यनेन शतृशानचोर्विधानात् पचन् पचमानः इत्यत्र कर्तुः द्योत्यार्थत्वेन, तस्य विशेषणतैव इति नियमात् कर्तुः विशैष्यत्वं न सिद्ध्यति । कृत्सु कर्तुः विशेष्यत्वमिति सर्वसिद्धान्तो भज्येत इति चेद्-

उच्यते । तिङ्भिः असत्त्वभूतक्रियाऽभिधीयते । तत्स्थानिकलकारस्यापि तदर्थकत्वेऽपि 'आस्यमाने शय्यमाने च गतः 'इत्यादौ शानचि सत्त्वभूतक्रियाप्रतीत्या तत्स्थानिलकारस्यापि तदर्थकत्वाय लः कर्मणि चेति सूत्रे भावे इत्यस्यावृत्त्याऽर्थद्वयबोधकत्ववत् कर्त्राद्यंशेऽपि आवृत्त्या कर्त्रादावर्थे ऽपि शतृशानचोः लड्विधानात् ।

७० उपसर्गस्वरूपनिरूपणम्

उपसृज्यतेऽनेन इत्युपसर्गः । उपपूर्वकसृजधातोः बाहुलकात् करणे हलश्च (३-३-१२१) इति घञि चजोः कु घिण्ण्यतोः (७-३-५२) इति कुत्वे लघूपधगुणे रपरत्वे उपसर्ग इति पदं निष्पन्नं भवति । 'उपसर्गाः क्रियायोगे '(१-४-५९) इति सूत्रेण क्रियायोगे प्रादीनामुपसर्गसंज्ञा प्रतिपादिता। क्रियायोग एव एतेषामुपसर्गसंज्ञाविधानात् केवलानां प्रयोगो न भवति । एते तूपसर्गाः द्योतका एव । एतेषां द्योतकत्वं सर्वदार्शनिकसम्मतम् । द्योतकत्वञ्च तात्पर्यग्राहकत्वम् । उपसर्गवशाद् धात्वर्थोऽपि भिद्यते । आह च -

वैयाकरणसिद्धान्तकौमुद्याम् -

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ।। इति ।।

कारिकायामुपसर्गपदं निपातस्याप्युपलक्षणम् । एवञ्च निपातोपसर्गावुभावपि द्योतकावेव ।।

आकृत्यधिकरणे भट्टपादा अपि एवमवोचन् -

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः ।
क्रियते संशयोत्पत्ते र्नोपसर्गनिपातयोः ।।
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते ।
यदर्थद्योतकौ तौ तु वाचक स्स विचार्यते ।।

तेषामयमाशयः - नामार्थे एकं, द्विकं, त्रिकं चतुष्कं, पञ्चकं वेति सन्देहाः सन्ति । आख्यातार्थविषयेऽपि फलव्यापारौ धात्वर्थः । फलमात्रं, व्यापारमात्रं वा, संख्याकालकारकाण्यपि धात्वर्थ इति । तिङर्थः कर्ता, कृति र्वा इत्यादयः संशयाः जायन्ते । तथा उपसर्गनिपातयो र्विषये संशयानुत्पत्ते स्तद्विचारो न क्रियतेऽस्माभिः इति। अनेनोभयोः द्योतकत्वं स्पष्टं प्रतीयते।

७१. वाक्यपदीयकाराणामाशयः

अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम्।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ।। (वा,द्वि १८०)

अस्या अर्थः - अडादीनाम् - अडाड्द्विर्वचनानाम्, व्यवस्थार्थम् = उपसर्गरहितस्याडादिकार्यार्थं शास्त्रे धातूपसर्गयोः पृथक्त्वेन = भेदेन प्रकल्पनम् । तु = वस्तुतस्तु धातुरेव तादृशः सोपसर्गः । अडाड्द्विर्व चनव्यवस्थार्थं केवलं धातवः पृथगुपदिष्टाः , वस्तुतः विशिष्टक्रियावचना एव सोपसर्गा इति सोपसर्गाणामेव धातुत्वम् । शास्त्रप्रक्रियानिर्वहणार्थं धातूपसर्गयोः विभागः कृतः । तावता न धातोः पूर्वमुपसर्गेण योगः , साधनबोधकप्रत्ययोत्पत्त्यनन्तरमेव तत्र परिनिष्ठितक्रियायाः भानादुपसर्गयोगो भवति। उक्तञ्च 'गतिर्गतौ' (८-१-७०) इति सूत्रे भाष्ये - ननु पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति ? नैतत्सारम् - पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण, किं कारणम् ? साधनं हि क्रियां निर्वर्तयति, तामुपसर्गो विशिनष्टि, अभिनिर्वृत्तस्य चोपसर्गेण विशेषः शक्यो वक्तुम् । यस्त्वसौ धातूपसर्गयोरभिसम्बन्धस्तमभ्यन्तरीकृत्य धातुः साधनेन युज्यते। अवश्यं चैतदेवं विज्ञेयं यो हि मन्यते - पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति , आस्यते गुरुणे'त्यकर्मकः ' उपास्यते गुरु'रिति केन सकर्मकः स्यात् इति ।

७२ उपसर्गाणां स्वरूपम्

क्वचित् सम्भविनो भेदाः केवलैरनिदर्शिताः ।
उपसर्गेण सम्बन्धे व्यज्यन्ते प्रपरादिना ।। (वा, द्वि १८७)

क्वचित् = पचत्यादौ, सम्भविनो भेदाः = प्रकृष्टपाकादयः, केवलैः = प्राद्युपसर्गरहितैः, अनिदर्शिताः= नितरां व्यक्ततया न दर्शिताः सन्तः, उपसर्गेण प्रपरादिना सम्बन्धे सति, व्यज्यन्ते = व्यक्ततया बोध्यन्ते ।

एतेषामुपसर्गाणां द्योतकत्व, माहोस्विद् वाचकत्वमिति संशये

लौकिकानां व्यवहारानुसारेण परिशीलयामश्चेत् नैते द्योतकाः, अपि तु वाचकाः । तथाहि - ष्ठा धातोः केवलस्य गतिनिवृत्तिवाचकत्वं तिष्ठतीत्यादावनुभूयते । प्रतिष्ठते इत्यादौ प्रेणोपसर्गेण गतिवाचकत्वं तस्यैव धातोः व्यवस्थाप्यत इति । तथा चोक्तम् 'धात्वर्थं बाधते क्वचिद् ' इति । अत्रोपसर्गकर्तृको धात्वर्थस्य बाधो नाम धात्वर्थं प्रतिषिध्यान्यार्थ व्यवस्थापनमिति। प्रपचतीत्यादौ तु प्रकर्षः प्रतीयते धातूपसर्गौ सम्भूय विशिष्टक्रियारूपमाहतुः इति पक्षोऽप्यस्ति । अस्मिन् पक्षे उपसर्गधात्वोः विशिष्टक्रियारूपार्थाभिधानानुकूलं शक्तिमात्रं कुरुते इत्यभ्युपगमेन विशिष्टक्रियारूपाभिधाने धातोः सहकारिणः उपसर्गा इति । एते त्रयः पक्षाः वाक्यपदीये एवं प्रतिपादिताः -

सवाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा ।
शक्त्याधानाय धातो र्वा सहकारी प्रयुज्यते ।। (वा द्वि १८८)

स्थादिभिः केवलैर्यच्च गमनादि तु गम्यते ।
तत्रानुमानाद्द्विविधा तद्धर्मा प्रादिरुच्यते ।। (वा द्वि १८९)

केवलैः स्थादिभिः गतिनिवृत्तिवाचकत्वेन प्रसिद्धैः प्रतिष्ठते इत्यादावुपसर्गसमभिव्याहारे धातूनामनेकार्थत्वप्रवादमाश्रित्य धातुः अनेकार्थः उपसर्गश्च द्योतकः इत्यनुमानेनोपसर्गाणां द्योतकत्वं व्यवस्थापितम् । तथा च प्रतिष्ठते इत्यत्र धातुना गतिरेव बोध्यते । अनुमानप्रकारश्चेत्थम् - ष्ठा धातुरनेकार्थः, धातुत्वात्, उभयवादिसम्मतानेकार्थयजत्यादिधातुवद्। अनेनानुमानेन धातूनामनेकार्थत्वं सिद्ध्यति । एवमेव अन्येऽपि धातवोऽनेकार्थाः धातुत्वाद् ष्ठा धातुवदिति ।

उपसर्गस्तु प्रपचतीत्यत्र विशेषतः दृष्टादनुमानाद् गतिद्योतकः । अनुमानप्रकारश्चेत्थम् - प्रतिष्ठते इत्यत्र प्रशब्दः आदिगतिरूपकर्मद्योतकः प्रशब्दत्वात्, पच्यादिपूर्वोदितदृष्टप्रशब्दवदिति । एतदनुमानमूलकेन सामान्यतो दृष्टानुमानेन सर्वेषामुपसर्गाणां द्योतकत्वं सिद्ध्यति । तथा हि - परादयः उपसर्गाः द्योतकाः, उपसर्गत्वात् प्रतिष्ठते इत्यत्र प्रोपसर्गवदिति ।

तृतीयपक्षे धातूपसर्गौ सम्भूयैवार्थविशेषं ब्रूत इति अर्थान्तराभिधाने धातोः सहकारिण उपसर्गाः । अयञ्च धातूपसर्गयोः सम्भूयैवार्थाभिधायकत्वपक्षः उपसर्गाणां लोकप्रसिद्धितः अर्थवत्त्व एव । अत एवोक्तम् - कश्चित्तमनुवर्तते । कश्चित् = उपसर्गः, तं = अर्थान्तरमभिदधतं धातुं, अनुवर्तते = सहकारितया अनुसरतीत्यर्थः। अत एवोक्तम् - अष्टाध्याय्याम् '' अधिपरी अनर्थकौ' (१-४-९३) इति ।

७३ उपसर्गाणां द्योतकत्वे युक्तिप्रदर्शनम्

वैयाकरणमतोन्मज्जने भट्टोजीदीक्षित एवमाह -

द्योतका प्रादयो येन निपाता श्चादय स्तथा।
उपास्येते हरिहरौ लकारो दृश्यते तथा।। (का सं ४२)

येन हेतुना प्रादयो द्योतकाः तेनैव हेतुना चादयो निपाताः द्योतकाः। अनेन ज्ञायते प्रादीनां द्योतकत्वं सिद्धमेवेति। हरिहरौ उपास्येते इत्यत्रोपासनरूपफलस्य धात्वर्थत्वात् स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूप सकर्मकत्वस्य सत्त्वात् कर्मणि लकारसिद्धिः। उपसर्गार्थस्य धात्वर्थत्वाभावे स्वार्थफलव्यधिकरणव्यापारवाचकत्वाभावेन सकर्मकत्वाभावात् कर्मणि प्रत्ययो न भवति, अकर्मकत्वाद् भावे स्यात्।

एवम् 'ईश्वरमनुभवति' इत्यत्रानुभवरूपोऽर्थः प्रतीयते। तत्र भासमानोऽर्थः किमुपसर्गस्य, धातोः, विशिष्टस्य वेति विकल्पे अनुभवस्योपसर्गार्थत्वे अनुगच्छतीत्यत्रापि तत्प्रतीत्यापत्तिः। तथा सति भू धातोः सकर्मकत्वापत्तेः। धातूपसर्गयोरुभयोः वाचकत्वे गौरवं भवति। अतो धातोरेवानुभवार्थे लक्षणा, तत्स्वीकारे उपसर्गः तात्पर्यग्राहकः। एवञ्च उपसर्गाणां द्योतकत्वमिति सिद्धम्।

७४ निपाताः

निपतनं निपातः। निपूर्वक पत्लृ धातोः भावे 'भावे (३-३-१८) इति घञि,' अत उपधायाः' (७-२-११६) इति उपधावृद्धौ निपात इति पदं निष्पन्नं भवति। अष्टके 'प्राग्रीश्वरान्निपाताः (१-४-५६) इत्यधिकारे 'चादयोऽसत्त्वे' (१-४-५७) इति सूत्रेण निपातलक्षणं स्पष्टीचकार पाणिनिः। सत्त्वं नाम लिङ्गसंख्यान्वययोग्यम्, तद्भिन्न मसत्त्वम्। एवञ्च लिङ्गसंख्यान्वययोग्याः चादयो निपाताः भवन्ति। शब्दतः प्रतीयमानोऽर्थो द्विविधः - १ द्योत्यार्थः २ वाच्यार्थश्चेति। अनयो र्मध्ये कतरोऽर्थो निपातानामिति विषये दार्शनिकेषु मतभेदाः वरीवृत्यन्ते।

१. उपसर्गाणां निपातानाञ्च वैषम्यं नास्ति। उभयेषामपि द्योतकत्वमेवेति शाब्दिकाः।
२. उपसर्गाः द्योतकाः, निपाताः वाचकाः इति न्यायविदः।
३. उपसर्गाणां निपातानाञ्च द्योतकत्वं, वाचकत्वं वेत्यत्र नाग्रह इति जैमिनीयाः।

७५. निपातानां द्योतकत्वे युक्तयः

१. साक्षात्क्रियते, अलंक्रियते, उररीक्रियते इत्यादिषु कर्मणि लकारसिद्धिः प्रयोजनम्।
२. नामार्थ -धात्वर्थयोः साक्षाद्भेदेनान्वयोऽव्युत्पन्न इति व्युत्पत्तिभङ्गो न।
३. प्रातिपदिकार्थयोः विना षष्ठ्यादिकं भेदेनान्वयोऽव्युत्पन्न इति व्युत्पत्तिविरोधो न।
४. कीदृशो निर्, शोभनश्च द्रष्टव्यः इत्यादिप्रयोगाः न भवन्ति।
५. धवस्य खदिरस्य चेत्यादिप्रयोगाः अपि न भवन्ति।
६. काव्येषु सुलभतयाऽन्वयो भवति।
७. अब्राह्मणः इत्यत्र नञ्समासः सिद्ध्यति।
८. निपातानां प्रातिपदिकसंज्ञाऽपि सिद्ध्यति।
९. प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिविरोधोऽपि न भवति।

७६ निपातानां स्वरूपम्

भर्तृहरिः एवमाह -

निपाताः द्योतकाः केचित् पृथगर्थाभिधायिनः ।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः ।। (वा द्वि १९२)

केचिन्निपाताः द्योतकाः । यथा - वृक्षश्च प्लक्षश्च इत्यत्र च । केचिन्निपाताः पृथगर्थाभिधायिनः । यथा - शश्वत् , युगपत् ,एकपदे इत्यादयः। केचिदागमा इवानर्थकाः । यथा - अधि, परि, खलु, किल ।

चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः ।
प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते ।। (वा द्वि १९४)

यतश्चादयः पदत्वे सत्यपि केवलाः न प्रयुज्यन्ते, अतो द्योतकत्वमेव तेषाम् । वाचकत्वे हि गवादिपदवत् युक्तस्तेषां केवलानां प्रयोगः । प्रत्ययस्तु वाचकत्वेऽपि पदत्वाभावात् केवलो न प्रयुज्यते, अपदं न प्रयुञ्जीत इति, न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः इति च निषेधात् । तथा च वाचकावाचकयोः द्वयोरपि समभिव्याहारापेक्षायाः केवलानामप्रयोगस्य च साम्येऽपि अस्ति तयोः पदत्वभावाभावकृतो विशेषः, पदत्वे सति केवलानामप्रयोगस्य च वाचकत्वाभावसाधकत्वम् । एतेनेदमनुमानं सूचितं - चादयो वाचकाः न भवन्ति, पदान्तरसमभिव्याहारं विनाऽप्रयुज्यमानत्वात् व्यतिरेकेण गवादिपदवत् ।

७७. कर्मणि लकारसिद्धिप्रयोजनविवरणम्

साक्षात्क्रियते, अलंक्रियते, उररीक्रियते शिवः इत्यत्र कर्मणि लकारो विद्यते । अत्र विद्यमानानां साक्षात्कार-अलङ्कार-उररीकरणादीनां धात्वर्थत्वाभावे स्वार्थफलव्यधिकरणव्यापारवाचकत्वाभावेन सकर्मकत्वाभावात् कर्मणि लो न सिध्येत् । अतो निपातानां द्योतकत्वमङ्गीकर्तव्यम्। तथा सति साक्षात्कारादयोऽपि कृधात्वर्था एव भवन्ति, तेन

साक्षात्कारादिरूपफलस्य धात्वर्थत्वात् तद्व्यधिकरणव्यापारवाचकत्वेन सकर्मकत्वात् कर्मणि लकारः सिद्धः ।

अत्रेयं शङ्का - साक्षात्कारादीनां धात्वर्थत्वाभावेऽपि कृञः केवलस्यापि उत्पत्तिरूपफलसत्त्वात् तद्व्यधिकरणव्यापारवाचकत्वेन सकर्मकत्वात् कर्मणि लकारः सिध्यत्येव खलु इति ।

अत्रेदमुत्तरम् - प्रकृते कृञः उत्पत्तिरूपफलवाचकत्वासंभवात् साक्षात्कारादीनां च धात्वर्थत्वाभावे फलव्यधिकरणव्यापारवाचकत्वाभावेन अकर्मकतापत्तिः ।

ननु कोशे साक्षात्प्रत्यक्षतुल्ययोः (अमरकोषः ३-का २४५) इति पाठात् निपातानां पृथगर्थो भासत एव खलु इति चेत् -द्योत्यार्थमादायैव कोशकारस्तथा प्रत्यपादयत् ।

अत्रायं पूर्वपक्षः - निपाताः वाचका एव । साक्षात्क्रियते इत्यादिषु धातोः सकर्मकत्वमेवं साधयामः - स्वयुक्तनिपातान्यतरार्थफल-व्यधिकरणव्यापारवाचकत्वमिति लक्षणस्वीकारात् । समन्वय इत्थं - स्वं= कृञ्धातुः, तदर्थः= व्यापारः, तेन युक्तो निपातः, प्रकृते साक्षादिति , तदर्थः = व्यापारव्यधिकरणं साक्षात्काररूपं फलम्, इत्यतः कृञः सकर्मकत्वं सिद्धमिति ।

उच्यते । पूर्वोक्तलक्षणेन साक्षात्क्रियते इत्यत्र कर्मणि लो भवति। परं नामार्थधात्वर्थयोः भेदेन साक्षादन्वयोऽव्युत्पन्नः इति व्युत्पत्तिविरोधः स्यात् ।

७८. व्युत्पत्तिविरोधप्रदर्शनम्

नामार्थ -धात्वर्थयोः साक्षाद्भेदेनान्वयोऽव्युत्पन्न इति व्युत्पत्तिः । स्तोकं पचति इत्यत्र स्तोकमिति नामार्थस्याभेदेन पाकेऽन्वयेऽपि न दोषः इत्याशयेनोक्तं भेदेनेति । तण्डुलं पचतीत्यत्र नामार्थस्य विभक्त्यर्थद्वारा धात्वर्थे भेदेनान्वयदर्शनादुक्तं साक्षादिति । एवञ्च भेदसम्बन्धावच्छिन्ननामार्थ-

प्रकारकधात्वर्थविशेष्यकबोधे विशेष्यतासम्बन्धेन सुब्विभक्तिजन्योपस्थितिः कारणमिति फलति ।

अस्या अनङ्गीकारे तण्डुलकर्मकः पाकः इत्यर्थे तण्डुलः पचति इत्यस्यापि साधुतापत्तिः । अतो व्युत्पत्तिरवश्यमङ्गीकर्तव्या । प्रकृते दोषवारणाय व्युत्पत्तौ निपातातिरिक्तेति निवेश्य निपातातिरिक्त नामार्थ -धात्वर्थयोः साक्षाद्भेदेनान्वयोऽव्युत्पन्न इति कार्यकारणभावान्न दोषः । किन्तु व्युत्पत्तौ तद्विशेषणनिवेशप्रयुक्तं गौरवं भवति ।

७९. व्युत्पत्त्यन्तरविरोधप्रदर्शनम्

प्रातिपदिकार्थयोः विना षष्ठ्यादिकं भेदेनान्वयोऽव्युत्पन्नः इति व्युत्पत्तिः । निपातानां वाचकत्वे 'चैत्र इव मैत्रः' इत्यत्र चैत्रसादृश्यवान् मैत्रः इति बोधोदयेन चैत्र इति नामार्थस्य इवार्थे निपाते विना षष्ठ्यादिकं भेदेनान्वयापत्त्या पूर्वोक्तव्युत्पत्तिविरोधः । व्युत्पत्त्यनङ्गीकारे 'राजा पुरुषः ' इति वाक्येऽपि राजा इति नामार्थस्य पुरुष इति नामार्थे स्वस्वामिभावसम्बन्धेनान्वये 'राजसम्बन्धि पुरुषः' इति भेदेनान्वयापत्तेः । अत इयं व्युत्पत्तिरवश्यमभ्युपगन्तव्या । अत्र दोषवारणाय व्युत्पत्तौ निपातातिरिक्तेति विशेषणे गौरवं स्पष्टमेव ।

८०. दोषान्तरप्रदर्शनम्

निपातानां वाचकत्वे 'कीदृशो निश्चयः' इतिवत् कीदृशो निः इति प्रयोगापत्तिः । एवमेव 'शोभनः समुच्चयो द्रष्टव्यः ' इतिवत् शोभनश्च द्रष्टव्यः"इति प्रयोगस्यापि साधुता स्यात् । तथा 'धवश्च खदिरश्च = धवखदिरौ, तयोः धवखदिरयोः समुच्चयः इतिवत् धवस्य खदिरस्य च इति प्रयोगोऽपि स्यात् ।

८१. काव्यादिषु दोषप्रदर्शनम्

निपातानां वाचकत्वे काव्यादावन्वयो न स्यात् । तथा हि -

ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुन्त्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ।। (रघुवंशम् ४सर्गे श्लो.सं६६)

अत्रोत्तरार्थे उस्रसादृश्यं शरेषु, रससादृश्यमुदीच्येषु च बोध्यते । निपातानां द्योतकत्वे उस्रशब्दस्यैव उस्रसादृश्यार्थकत्वेन 'समानाधिकरणनामार्थयोरभेदान्वयः' इति व्युत्पत्त्या उस्रसदृशाभिन्नैः शरैः इत्यर्थः सङ्गच्छते ।

निपातानां वाचकत्वे उस्रैरित्यत्र तृतीयया करणत्वं बोध्यते । परन्तु तेषां करणत्वं नास्ति, उस्रसदृश- शरेषु करणत्वं वर्तते । उस्रसदृशशरबोधक उस्रैरिवेत्यत्र विभक्ति र्नास्ति। उस्रसदृशानां करणत्वबोधने उस्रपदोत्तरतृतीया समर्था न भवति - प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थ-बोधकत्वमिति व्युत्पत्तेः। इवेति निपातस्य चासत्त्वार्थकतया तदुत्तरं तृतीयाया असम्भवात् ।

इवार्थस्य करणत्वे सत्त्वार्थकत्वात् ' चादयोऽसत्त्वे (१-४-५७) इति निपातत्वाभावे 'स्वरादिनिपातमव्ययम् (१-१-३७) इति अव्ययसंज्ञाया अप्राप्त्या अव्ययादाप्सुपः (२-४-८२) इत्यस्याप्रवृत्त्या तदुत्तरं तृतीयाया श्रवणप्रसङ्गः।

यद्येतादृशप्रयोगाणामुपपत्त्यर्थं विशेषणविभक्तेरभेदार्थकत्वं, साधुत्वार्थकत्वं वा कल्प्येत, तथा सत्यन्वयो युज्यत एवेति चेद् उच्यते। निपातानां वाचकत्वे पुनरनन्वय एव। शरैरुस्रैरित्युभयोरपि समानविभक्तिकत्वेन समानाधिकरण- नामार्थयोरभेदान्वयः इति व्युत्पत्त्या अभेदान्वये 'उस्राभिन्नैः शरैः'इत्यर्थो वर्णनीयः - शर उस्रो नेति भेदसत्त्वाद् अभेदान्वयो बाधितः। परन्तु न उस्रपदोत्तरतृतीयार्थस्य इवार्थेऽन्वयः सम्भवति। नहि उस्राभिन्नसदृशाभिन्नशरः इत्यतः तस्य शरे, शर उस्रो नेति भेदसत्त्वाद् अभेदान्वयो बाधितः।

निपातानां द्योतकत्वे उस्रप्रतियोगिकसादृश्यविशिष्टाभिन्नः शर इति बोधो भवति। एवमेव -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।। (रघुवंशः प्र स १)

इत्यत्र वागर्थयोः वदिकर्मत्वाभावात् तदुत्तरद्वितीयाया अनन्वयः, इवार्थस्य कर्मत्वान्वये बोधो न स्यात्।

७२. अब्राह्मणः इत्यत्र समाससिद्धिः

ननु निपातानां द्योतकत्वे अब्राह्मणः इति नञ्समासे नञः अर्थाभावे उत्तरपदार्थस्य पूर्वपदार्थनिरूपित- प्राधान्यासम्भवात् उत्तरपदार्थप्रधानस्तत्पुरुषः इति लक्षणस्याव्याप्त्यापत्तिः। एवं नञोऽर्थवत्त्वाभावेन प्रातिपदिक- त्वाभावात् विभक्तिरपि ततो न स्याद् इति चेत् -

अत्रेदमुत्तरम् - उत्तरपदार्थप्रधानस्तत्पुरुषः 'इत्यादि लक्षणानि सिद्धान्ते प्रायिकाणि। वास्तवानीति पक्षेऽपि द्योत्यार्थमादायैव नञ्समासे उत्तरपदार्थप्राधान्यम्, अतो न दोषः। द्योतकत्वेऽपि अर्थवत्त्वं भवत्येव। अर्थप्रतीतिजनकज्ञानविषयत्वमेव हि अर्थवत्त्वम्' अर्थवत्सूत्रे निर्दिष्टम्, न तु शक्तिलक्षणान्यतरसम्बन्धेनार्थवत्त्वम्। एतादृशार्थवत्त्वस्य प्रतिष्ठते , घटश्चेत्यादौ प्र, च इत्यादि निपातानामबाधात् भवति प्रातिपदिकत्वम्।

७३. निपातानां विभागः

निपाताः त्रिधा दृश्यन्ते - १ उपमार्थकाः २ कर्मोपसंग्रहार्थकाः ३ पादपूरणाः। एते उपमार्थकाः, एत एव पादपूरणार्थकाः इति नियमो नास्ति। कदाचित् उपमार्थका अपि , अन्यत्र पादपूरणे प्रयुज्यन्ते। प्रकरणवशात् तदर्थो निर्णेयः।

१. उपमार्थकाः - इव, न, चित्, नु, एते उपमार्थकाः । अग्निरिव, इन्द्र इव । न इति प्रतिषेधार्थकत्वेन, उपमार्थकत्वेन च वेदे दृश्यते। भाषायां तु प्रतिषेधार्थक एव। 'नेन्द्रं देवममंसत' अत्र नेति प्रतिषेधार्थकः। इन्द्रं देवं न अमंसत। द्रुमदासो न सुरायाम् इत्यत्र नेत्युपमार्थकः। सुरापानकर्तृभिः समानः इत्यर्थः। इन्द्रो न, मृगो न भीमः इत्यत्र नेत्यस्य उपमार्थकत्वम्। न मृगः, नेन्द्रः, न जायते , नास्ति इत्यत्र निषेधार्थकत्वम्। दधिचित् इत्यत्र चित् उपमार्थकः। 'आचार्यश्चिदिदं ब्रूयात्' इत्यत्र चित् पूजार्थकः। पूज्य आचार्य एवं ब्रूयादित्यर्थः। कुल्माषाश्चिदाहर इत्यत्र अवकुत्सार्थकः, कुल्माषकुले नष्टो जात

इत्यर्थः। 'वृक्षस्य नु ते पुरुहूत वयाः' वृक्षस्य इव ते पुरुहूत शाखाः इत्यर्थः। इदं नु करिष्यामि इत्यत्र हेतूपदेशे, कथं नु करिष्यामि इत्यत्रानुपृष्टे।

२. **कर्मोपसंग्रहार्थकनिपाताः** अर्थसंयोगार्थं प्रायुक्षत। समासलौकिक-विग्रहवाक्येषु एतेषां प्रयोगः दृश्यते। च इति समुच्चयार्थकः।' अहं च त्वं च वृत्रहन् च 'इति। समुच्चयार्थे' आ' इति। 'वा' इति विचारणार्थे विद्यते। हन्ताहं पृथिवीमिमां निदधानीह वेह वा'।

त्वा इति त्वमित्यर्थको निपातः। वायु र्वा त्वा मनु र्वा त्वा इति। अह, ह इत्युभौ विनिग्रहार्थकौ - अयम् अह इदं करोतु, एवं करोतु इत्यभिप्राये। इदं ह करिष्यामि।

उ' इति विनिग्रहार्थे प्रयुज्यते, विशिष्योत्तरे एव। यथा -मृषा इमे वदन्ति इति पृष्टे सति इति 'सत्यम् उ ते वदन्ति। पादपूरणेऽपि इदमु, तदु, इत्यादिषु प्रयुज्यते।

हि इति बहुष्वर्थेषु उपयुज्यते -

इदं हि करिष्यामि - हेतूपदेशे वर्तते।

कथं हि करिष्यामि - अनुपृष्टे विद्यते।

कथं हि व्याकरिष्यामि - असूयायाम् अस्ति।

किल' इति विद्याप्रकर्षे - एवं किल इत्यत्र। न, ननु - एतौ संप्रयोगे, अनुपृष्टेऽपि विद्येते - न किलैवम्, ननु किलैवम्।

मा प्रतिषेधार्थकः - मा कार्षीः, मा भूत्, मा हार्षीः।

खलु इत्यपि प्रतिषेधार्थकः - खलु कृत्वा, खलु कृतम्। पादपूरणेऽपि दृश्यते - एवं खलु तद्बभूव।

शश्वत् इति भाषायां विचिकित्सार्थकः। शश्वत्, एवम्, इत्यनुपृष्टे। एवं शश्वत् इत्यत्र अस्वयं पृष्टे विद्यते। नूनम् इत्यपि विचिकित्सार्थीयो भाषायाम्। वेदे तु पादपूरणेऽपि।

७४. उपसंहारः

शब्दब्रह्मज्ञानं व्याकरणस्य मुख्यं प्रयोजनम्। तच्च शब्दब्रह्मैव 'स्फोटः' इत्यभिधीयते। स्फुटति अस्मादर्थ इति, स्फुट्यते=व्यज्यते वर्णैरसाविति व्युत्पत्तिभ्यां शब्दार्थौ बोध्येते। स्फुट विकसने इत्यस्माद्धातोः घञि निष्पन्नोऽयं शब्दो वाच्यवाचकोभयपरः।

परमेश्वरान्मायावृत्ति र्जाता। मायावृत्तितो बिन्दु[1]रूपमव्यक्तं त्रिगुणं (गुणत्रयात्मिका) प्रकृतिरजायत। इदमेव शक्तितत्त्वम्। तस्य बिन्दोरचिदंशो बीजम्। चिदचिन्मिश्रोंऽशो नादः। चिदंशो बिन्दुः। अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते। अस्मादिबिन्दोः शब्दब्रह्मापरनामधेयम्, वर्णादिविशेषरहितम्, ज्ञानप्रधानम्, सृष्ट्युपयोग्यवस्थाविशेषरूपम्, चेतनमिश्रम्, नादमात्रमुत्पद्यते। एतज्जगदुपादानमेव 'रवा,परा' आदि शब्दैः व्यवह्रियते। उक्तञ्च -

बिन्दोस्तस्मादिभद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्।
स एव (रवः) श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते।। इति।।

(प्रपञ्चसा तं पट १ श्लो ४३)

एतत्सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते। ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थपवनसंस्कारः, तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठया निष्पन्नं 'परा वाग्' इत्युच्यते। एषा सूक्ष्मतमा। अस्याः वाचोऽधिदेवता 'ईश्वरो' भवति।

---

१. सच्चिदानन्दविभवात् सकलात्परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दु समुद्भवः ।।
पराशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः ।
बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः।।
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ।
समवायः समाख्यातः सर्वागमविशारदैः ।।
भिद्यमानात्पराद्बिन्दोरव्यक्तात्मा ततोऽभवत्।
शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः ।।

ततः वायुपर्यन्तमागच्छता वायुनाऽभिव्यक्तं मनोविषयः 'पश्यन्ती वाग्' इत्युच्यते। एषा सूक्ष्मतरा भवति। अस्याः अधिदेवताऽपि ईश्वर एव। ततः हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशेऽभिव्यक्तं तत्तदर्थविशेषतत्तच्छब्द-विशेषोल्लेखिन्या बुद्ध्या विषयीकृता परश्रवणयोग्या 'मध्यमा वाग्' इत्युच्यते। एषा 'सूक्ष्मा' भवति। हिरण्यगर्भोऽस्या अधिदेवता भवति। स्वयं तु कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन उपांशुशब्दप्रयोगे च श्रूयमाणाऽसौ। सैव चास्यपर्यन्तमागच्छता तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्त्य तत्तस्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या 'वैखरी वाग्' इत्युच्यते। एवं विद्यमानासु चतसृषु वाक्षु तृतीया या वरीवर्ति, तामेव 'स्फोटः'इति व्यवहरन्ति। स्फोटोऽय मष्टविधः- १.वर्णस्फोटः २.पदस्फोटः ३. वाक्यस्फोटः ४. वर्णजातिस्फोटः ५. पदजातिस्फोटः ६. वाक्यजातिस्फोटः ७.अखण्डपदस्फोटः ८. अखण्डवाक्यस्फोटः इति। एषु अखण्डवाक्यस्फोट एव मुख्यः। उक्तञ्च दार्शनिकाग्रेसरेण भर्तृहरिणा वाक्यपदीये -

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।। (वा द्वि १०)

यथाऽखण्डे निर्विभागे पदे बालव्युत्पादनाय प्रकृतिप्रत्ययादयः कल्पनया प्रविभज्यन्ते, तथाऽखण्डे वाक्येऽपि कल्पितानां पदानामपोद्धारः प्रविभागो वाक्यार्थप्रतिपादनायोपवर्ण्यते, वाक्यार्थप्रतिपत्तेः पदार्थप्रतिपत्तिपूर्वकत्वात्। पदानां कल्पितत्वं वाक्यपदीयकार इत्थं प्रतिपादयामास।

यमर्थमाहतु र्भिन्नौ प्रत्ययावेक एव तम्।
क्वचिदाह पचन्तीति धातुस्ताभ्यां विना क्वचित्।। (वाद्वि २३०)

यथा पचन्तीत्यत्र कर्तृरूपमर्थं भिन्नौ प्रत्ययौ शप्तिङावाहतुः। तमर्थमेक एव प्रत्ययः क्वचिदभिधत्ते, यथा - अत्ति[1], जुहोती[2]त्यादौ, क्वचिद्

१. अद भक्षणे इत्यस्मात् कर्तरि लट्, तिप्, शप्, अदिप्रभृतिभ्यः शपः इत्यनेन शपो लुक् चर्त्वम्।

२. हु दानादनयोः इत्यस्माद् कर्तरि लट्, तिप्, शप्, जुहोत्यादिभ्यः श्लुः इत्यनेन शपः श्लुः, श्लौ इत्यनेन द्वित्वं, अभ्यासकार्याणि, कुत्वं, धातोः गुणः।

'अहन्'[1] वृत्रम् इन्द्रः' इति वाक्यघटक अहन्नितिपदे शप्तिङ्भ्यां विना धातुरेव कर्तारं बोधयति, क्वचित्तु प्रकृतौ विनिवृत्तायां प्रकृत्यर्थः प्रत्ययेनाभिधीयते, यथा -'इयान्'[2], इः[3]'इत्यादौ। एवं क्वचिद्द्वाभ्यां प्रत्ययाभ्यां, क्वचिदेकेन प्रत्ययेन, क्वचिद्धातुनैव, क्वचित्केवलप्रत्ययेन चार्थप्रतीतेः प्रकृति-प्रत्ययतत्तदर्थानामवास्तवत्वं प्रतीयते।

इत्थं कल्पितानि पदानि सुबन्त-तिङन्ताभ्यां (कारकात्मा-क्रियात्मा, सिद्ध-साध्यलक्षण इति वा) भेदाभ्यां द्विधेति केचन, नामाख्यातोपसर्गनिपातभेदै श्चतुर्धा इत्यपरे, नामाख्यातोपसर्गनिपातकर्मप्रवचनीयभेदैः पञ्चधेत्यन्य इति विभिन्नाः वादाः शोश्रूयन्त इति वाक्यपदीयकारेणैव असूच्यत। यथा-

द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधाऽपि वा।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्।। (वा जा १)

यथा वाक्ये पदकल्पनानुरोधेन पदार्थकल्पना, तथैव पदे प्रकृतिप्रत्ययानुरोधेन प्रकृत्यर्थ - प्रत्ययार्थरूप- पदार्थैकदेशकल्पनाऽपि।

पदमेकं दृष्ट्वा श्रुत्वा वेदं नाम इति, अथवाऽऽख्यातमिति वा निश्चेतुं न शक्यते। यथा - अश्वः इति।

टु ओश्वि गतिवृद्ध्योः इत्यस्माल्लुङि मध्यमपुरुषैकवचने 'अश्वः' इति रूपं भवति। अश्नुते मार्गं व्याप्नोतीत्यर्थे अशू व्याप्तौ इत्यस्मादुणादिकन्प्रत्यये अश्वः इति रूपं भवति। तिङन्तपदेन कर्तृविशिष्टातीतकालिका श्वयतिक्रिया बोध्यते। नामपद मश्वत्वजातिमतोऽर्थस्य

१. हन हिंसागत्योः इत्यस्मात् कर्तरि लङ्, अडागमः,तिप्, शप्, तस्य अदिप्रभृतिभ्यः शपः इत्यनेन लुक् ,इतश्चेतीकारलोपः, हल्ङ्यादिना त् इत्यस्य लोपः ।

२. इदं परिमाणमस्य इत्यर्थे इदं शब्दात् वतुप्, वकारस्य किमिदंभ्यां वो घः इत्यनेन घकारः , घस्य आयनेयीनी-इत्यादिना इयादेशः , इदमित्यस्य ईशादेशः,यस्येति च इत्यनेन तस्य लोपः , तद्धितान्तत्वेन प्रातिपदिकसंज्ञायां सुः। अत्र प्रकृतिः लुप्ता , प्रत्यय एवावशिष्टः !

३. अकारो विष्णुवाचकः, तस्य अपत्यमित्यर्थे अशब्दात् षष्ठ्यन्तात् अत इञ् इति तद्धितप्रत्ययः। यस्येति च इत्यनेन अकारलोपः । प्रत्ययमात्रं विद्यते , प्रकृतिस्तु लुप्ता।

द्रव्यस्याभिधायकम्। एवमाख्यातसरूपाः नामशब्दाः अपि भवन्ति। एतादृशस्थलेषु वाक्यार्थपर्यालोचनयैव पदार्थनिर्णयः कर्तव्यः । यथा- त्वमश्वोऽजापयः[1] शत्रुभवनानि इति वाक्ये ' अश्वः , अजापयः ' इति द्वे तिङन्तपदे इति निश्चीयते । त्वं वृद्धिमापः, वृद्धिमाप्तश्च शत्रुभवनानि जेतुं सैन्यानि परं = राजानं वा न्ययोजय इत्यर्थः । अत एवोक्तम् -

नहि किञ्चित्पदं नामरूपेण नियतं क्वचित् ।
पदानामर्थरूपञ्च वाक्यार्थादेव जायते ।।

एवमेव -तेन[2] , तस्य[3] ,यस्य[4] ,भवति[5] इत्यादयो नामाख्यातसरूपाः विद्यन्ते । हरिणाप्युक्तम् -

नामाख्यातसरूपा ये कार्यान्तरनिबन्धनाः ।
शब्दा वाच्याश्च तेष्वर्थो न रूपादधिगम्यते ।। (वा द्वि ३१८)

एवं कल्पितेष्ववयवेष्वर्था अपि कल्पिताः । काल्पनिक्यां मस्यां मवस्थायां भासमानेष्वर्थेषु शास्त्रेषु दार्शनिकाः बहुधा विचारान् प्रास्ताविषुः। ते चार्थाः सप्रमाणमत्रोपनिबद्धाः । विपश्चितः अत्रत्यं तत्त्वं विभावयन्त्विति सविनयं मभ्यर्थये। इति शम्।

---

१. अजायाः पयः = अजापयः इति नामपदम् । जि जये इत्यस्मात् धातोः कश्चिदजेयं जितवान् तमन्यो नियुक्तवानित्यर्थविवक्षायां हेत्वर्थे णिचि क्रीङ्जीनां णौ इत्यनेन आत्वे , पुगागमे ,जापि इति स्थिते लङि , सिपि, शपि, गुणायादेशयोः कृतयोः , इतश्चेति सिपः इकारलोपे, अडागमे, सकारस्य रुत्वविसर्गयोश्च ।

२. तच्छब्दस्य तृतीयाविभक्त्येकवचनम् तेन ताभ्याम् तैः । तनु विस्तारे इत्यस्माल्लटि मध्यमपुरुषबहुवचने - तेनिथ- तेनथुः- तेन इति रूपं भवति ।

३. तच्छब्दस्य षष्ठीविभक्त्येकवचनम् - तस्य- तयोः तेषाम् । तसु उपक्षये लोट् मध्यमपुरुषैकवचनम् ।अयं धातुः दिवादिगणेऽस्ति । तस्य /तस्यतात्- तस्यतम् तस्यत ।

४. यच्छब्दस्य षष्ठीविभक्त्येकवचनम् - यस्य ययोः येषाम् । यसु प्रयत्ने दैवदिकस्य लोट् मध्यमपुरुषैकवचनम् । यस्य / यस्यतात् - यस्यतम् - यस्यत ।

५. भवच्छब्दस्य सप्तमीविभक्त्येकवचनम् । भवति - भवतोः - भवत्सु । भू धातोः लट् प्रथमपुरुषैकवचनम् - भवति - भवतः - भवन्ति।